वर्षम्-५ संयुक्ताङ्कः-१७-१८

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११४ वैक्रमाब्दः २०६९ आषाढ-शुक्ल १२ - पौषकृष्ण ३ शकः १९३४ जुलाई - दिसम्बर २०१२

## स्वागतं कुलाध्यक्षेभ्यः



डा. मल्लिपूडि मङ्गपति पल्लं राजु इति सम्पूर्णनामधेयस्यास्य महोदयस्य जन्म ३१ अगस्त, १९६२ तमे दिनाङ्के आन्ध्रप्रदेशस्य पूर्वगोदावरी-जिल्लान्तर्गते पिठापुरे समभवत्। देशसेवाव्रती अस्य पितामहः मल्लिपूडि पल्लं राजुः स्वातन्त्र्यसेनानी आसीत्। अस्य पिता श्री एम.एस.सञ्जीवीरावः १९८२-१९८४ मिते काले भारतशासने केन्द्रीयो मन्त्री आसीत्। धीमति परिवारे लब्धजन्माऽयं स्वीयाम् आरम्भिकीं शिक्षां हैदराबादे परिसमाप्य विशाखपट्टनस्थ-आन्ध्रविश्वविद्यालयतः 'इलेक्ट्रोनिक्स एण्ड कम्युनिकेशन इञ्जीनियरिंग' इत्यस्मिन् विषये बी.ई. उपाधिमलभत्। ततः स फिलाडेल्फियातः (संयुक्तराज्य-अमेरिकातः) टेम्पलविश्वविद्यालयात् एम.बी.ए. अकरोत्। सङ्गणकतन्त्रे सञ्चारतकनीकीक्षेत्रे च (कम्प्युटर एण्ड इन्फॉरमेशन टेक्नालाजी इत्यत्र) तस्य उत्तमं ज्ञानम् अनुभवश्च वर्तते।

अनेन महोदयेन १९९४-९७ इत्यस्मिन् काले भारतीयवायुसेवाविभागे निदेशकत्वेन कार्यं निर्व्यूढम्। ततः सः उद्योगक्षेत्रे राजनीतौ च सक्रियो जातः। कांग्रेसदलस्य अयं नेता भारतीयसंसदः स्थायिसमितेः अध्यक्षरूपेण निर्वाचितो जातः। पुनः अयं द्विपर्यायं केन्द्रीय-रक्षाराज्यमन्त्रिरूपेणापि कार्यमकरोत्। सः २००४ तमे वर्षे संयुक्तराज्याऽमेरिकायाः न्यूयार्के संयुक्तराष्ट्रमहासभायां २००५ तमे वर्षे च पाकिस्थाने 'दक्षिण-एशियन-फ्री-मीडिया एसोसिएशन' (SAFMA)-सङ्गोष्ठ्यादिषु बहुषु अन्ताराष्ट्रियसम्मेलनेषु राष्ट्रस्य प्रातिनिध्यमकरोत्।

साम्प्रतं पञ्चदशलोकसभा-सदस्यत्वेन निर्वाचितोऽयं मानवसंसाधनविकासमन्त्रिरूपेण कार्यभारं वहति। एवंविध-गुणज्ञान-सम्पन्नोऽयं धीमान् अस्माकं राष्ट्रिय-संस्कृतसंस्थानस्य कुलाधिपतिपदम् अलङ्करोति इति काचित् सुखदा अनुभूतिः। अस्मै महोदयाय स्वागतं कुर्मो वयं राष्ट्रियसंस्कृतसंस्थानपरिवारसदस्याः।

## कुलपतिवाक्

संस्कृतवार्तायाः अयं संयुक्ताङ्कः २०१३तमस्य क्रैस्तवाब्दे सम्प्राप्ते प्रकाशमायाति। इतः पूर्वं २०१२तमे वर्षे एवंविधोऽपरः संयुक्ताङ्कः पञ्चदशविश्व-संस्कृतसम्मेलने आयोजयिष्यमाणे प्रकाशितः। एतस्मिन् एकवर्षस्य अन्तराले संस्कृतजगति नैके नूतनाः पदक्षेपाः जाताः। पञ्चदशविश्वसंस्कृतसम्मेलनावसरे अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य सामान्यसभया षट् प्रस्तावा ऊरीकृताः आसन्। ते सङ्क्षेपेण यथा-

१. राष्ट्रियसंस्कृतसंस्थानस्य अन्ताराष्ट्रियभूमिकां परिलक्ष्य अस्मै केन्द्रियसंस्कृतविश्वविद्यालयस्य वैधानिकी मान्यता देया।
२. राष्ट्रियपाण्डुलिपिमिशनस्य स्थायित्वं स्वायत्तत्वं च कल्पनीयम्।
३. द्वितीयस्य संस्कृतायोगस्य सङ्घटनं कार्यम्।
४. देशस्थानां विदेशस्थानाम् अनुसन्धानरतानां विदुषां कृते स्रोतःसामग्रीलम्भनाय राष्ट्रिय-संस्कृतस्रोतःकेन्द्रं स्थापनीयम्।
५. संस्कृतपाठशालानां समुन्नतये उपायाः विधेयाः।
६. पञ्चदशविश्वसंस्कृतसम्मेलने प्रस्तुताः शोधलेखाः राष्ट्रियसंस्कृसंस्थानेन प्राकाश्यं नेयाः।

एतेषां समेषामपि प्रस्तावानां क्रियान्वयनार्थमुपक्रमाः जाता इति सूचयन्तः परितोषमनुभवामः। पञ्चदशविश्वसंस्कृतसम्मेलने प्रस्तुताः शोधलेखाः पञ्चदशखण्डेषु प्रकाशनाय सज्जीक्रियन्ते। तेषु वेद-व्याकरण-खण्डानां प्रकाशनं सद्य एव भविता। अथ उपरि सूचितानां प्रस्तावानां क्रियान्वनं चिन्तयितुं भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन एका उच्चस्तरीया समितिः निर्मिता, तत्र न्यायमूर्तिः डा. मुकुन्दकमशर्मा, अध्यक्षः, पद्मभूषणं सत्यव्रतः शास्त्री, 'न्यूपा'विश्वविद्यालयस्य कुलाधिपतिः डा. कल्याणकुमारचक्रवर्ती, श्री जे.वीरराघवन् राष्ट्रियपाण्डुलिपिमिशनस्य निदेशिका डा. दीप्तित्रिपाठी, जगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यो रामानुजदेवनाथन्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे आचार्यः रमेशकुमारपाण्डेयः सदस्याः अयं च जनः सदस्यसचिवो नियोजितः। समित्या विशदं स्वीयं प्रतिवेदनं शासनाय समर्पितम्। अवश्यमेव एतेषु प्रस्तावेषु क्रियया स्वकीयमुत्तरं भारतशासनं दास्यतीत्याशास्महे।

संस्थानस्य चतुर्थो दीक्षान्तमहोत्सवः माननीयमानवसंसाधनविकासमन्त्रिणां संस्थानस्य कुलाधिपतीनां च आध्यक्ष्ये जनवरीमासस्य २१तमे दिवसे भविष्यति। अस्मिन् महतः समुल्लासस्य अवसरे संस्थानस्य सर्वेभ्य आचार्येभ्यः साधुवादान् वितरामि। वस्तुतस्ते सन्ति छात्राणां भाग्यविधातारः, तद्द्वारेण च देशस्यापि भाग्यविधातारः। तेषां सपर्यायां समर्प्येते मया स्वोपज्ञे एते आर्ये-

**मृत्पिण्डोपमशिष्यं भ्रमयंश्चक्रे स्वकीयशेमुष्याः।**
**रचयति पात्रविशेषं गुरुरुत्तमकुम्भकारसमः॥**

**वितरति विद्यां प्राज्ञे प्रतिभामादीपयंस्तदीयां सः।**
**बालानां सुखबोधं जनयति योग्यो गुरुश्च समम्॥**

अथ च, पुनरपि संस्कृतच्छात्रेभ्यः आभ्यां स्वकीयार्याभ्यामाशिषः शुभकामनाश्च वितरामि-

**संस्कृतसंस्कृतिरक्षादक्षाः कुशलास्तथा च सोत्साहाः।**
**नवयुगनिर्मातारो भवन्तु सर्वे च संस्कृतच्छात्राः॥**

**अभिनवमितिहासं ते रचयेयुः स्वैश्च कर्मभिर्नूनम्।**
**भयरहिता भयरहितं लोकं चापगतशोकं तम्॥**

*-राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः रमाकान्तशुक्लः

आचार्यः के.बी. सुब्बरायुडुः

डा. शुक्ला मुखर्जी

डा. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

**सम्पादकौ**

डा. रमाकान्तपाण्डेयः

डा. प्रफुल्लगडपालः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल्-सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

**संस्कृतवार्ता**

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975-2676

प्रकाशकः

कुलसचिवः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

e-mail : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in

## प्रतिवार्ता



### समीक्षा-पञ्चामृतम्

संस्थानस्य क्रियाकलापमखिलं या बोधयन्ती स्थिता
नानावर्णधरा कलेवरविभा विद्वन्मनोरञ्जिनी।
राधावल्लभसत्कवेः कुलपतेः या स्वप्नसन्दर्शिनी
सा जीयादिह संस्कृतप्रणिहिता वार्ता चिरं भूतले॥१॥

नानाकर्षकचित्रचित्तमचलं योत्प्रेरयन्ती सतां
यामुद्वीक्ष्य च विस्मरन्ति सहसा दुःखोच्चयं कोविदाः।
या सर्वान् विदुषस्तथैव करणाय प्रेरणादायिका
जीयात् कापि च संस्कृतप्रणिहिता वार्ता चिरं भूतले॥२॥

कामं सन्तु शतं लसन्तु भुवने विद्यालयाः संस्कृते
सद्गोष्ठ्या नवसर्जनेन बहुधा सच्छिक्षणाऽऽयोजनैः॥
संस्थानं च ततोऽपि गौरवमयीं धत्ते प्रतिष्ठां परा-
मेतत्तत्त्वपरीक्षणाय सुधियः वार्तां पठन्तूल्बणाम्॥३॥

राष्ट्रपत्याप्तसम्मानान् स्वामिनाथमहाशयान्
बिहारिरहसान् मुख्यान् सर्वान् सत्कुरुते जनः॥४॥

संस्कृतसेविनां नव्य-क्रियाणां या प्रकाशिका।
महिष्ठायै प्रतिष्ठायै वार्ता सा भवताद् द्रुतम्॥५॥

**डा. राजकुमारमिश्रः**
(सहायकाचार्यः साहित्यविभागः)
हरियाणा-संस्कृतविद्यापीठम्, बघौला, पलवल (हरियाणा)

## राष्ट्रपतिसम्मानितानां नामानि उद्घोषितानि

१५ अगस्त, २०१२ दिनाङ्के मानवसंसाधनविकासमन्त्रालयेन संस्कृत-पालि-प्राकृतभाषाणां सेवायै २०१२ तमस्य वर्षस्य कृते राष्ट्रपतिसम्मानेन (President Certificate of Honour इत्यस्य) महर्षिबादरायणव्याससम्मानेन (Maharshi Badrayan Vyas Samman इत्यस्य) च सभाजयिष्यमाणानां विदुषां नामानि उद्घोषितानि-

**राष्ट्रपतिसम्मानार्थं चिता विद्वांसः *(President Certificate of Honour)***

**संस्कृते** – १. श्रीकृष्णयाजी, २. आचार्यः कृष्णानन्दझाः, ३. श्रीमती मनीषा पाठक, ४. डा. रवीन्द्रकुमारनागरः, ५. श्री अम्बाराममणिशङ्करजोशी, ६. डा. रामेश्वरदत्तशर्मा, ७. श्रीहरीशचन्द्ररेणापुरकरः, ८. डा. के. चन्द्रशेखरननायरः, ९. डा. चान्दे पङ्कजत्र्यम्बकः, १०. पं. गोविन्दचन्द्रमिश्रः, ११. स्वामिनिगमबोधतीर्थः (राधाकृष्णः), १२. डा. पुष्करदत्तशर्मा, १३. श्रीपझवेरीचक्रवर्तिशठकोपाचारियरः, १४. आचार्यः सुधांशुशेखरशास्त्री, १५. डा. जयदेववेदालङ्कारश्च।

**अन्ताराष्ट्रियसंस्कृतविद्वान्** – आचार्यः जार्जकार्डोना

**पालि/प्राकृतम्** – १. आचार्यः सुदर्शनलालजैनः

**महर्षिबादरायणव्याससम्मानार्थं चितास्तरुणा विद्वांसः ( *Maharshi Badrayan Vyas Samman* )**

**संस्कृते** – १. डा. परमानन्दझाः, २. डा. के.ई. मधुसूदनन्, ३. डा. विष्णुकान्तपाण्डेयः, ४. डा. शत्रुघ्नत्रिपाठी च।

**पालि/प्राकृतम्** - १. डा. रजनीशशुक्ला

## नववर्षमङ्गलम्

प्रावरणो हिमशैत्यादार्तानामपि तथा जनानां स्यात्।
क्रैस्तवनववर्षोऽयं हर्षोल्लासकरोऽस्तु सदैव॥

निर्गच्छंस्त्रपयाऽवनम्रवदनः संवत्सरः प्राक्तनः
दित्सन् दायमुवाच खिन्नमनसा चागन्तुकं वत्सरम्।
ऊढो यो मनुजस्य पापनिचयैर्लिप्तो भृशं दुर्वहो
भारोऽयं ननु वत्स वत्सर तव स्कन्धे समारोप्यते॥

दम्भोलिप्रखरैः खरैर्नृपशुभिः क्रूरैस्तथा दारुणै-
र्हन्यन्ते च बलात्कृताः प्रतिदिनं कन्यास्तथा चाबलाः।
क्रव्याद्भिः प्रविलुप्यतेऽङ्गलतिका मातुर्हठान्निर्घृणं
येन श्वापदसङ्कुलेयमवनी सञ्जायते सर्वथा॥

एनां रक्ष च मानय स्वजननीस्तन्यस्य लज्जां तथा
शूलारोपणमेव तान् गमय ये लुण्टन्ति शीलं स्त्रियाम्।
इत्थं वृद्धजनेन खेदसहितं बालो यथा बोधितः
सोऽयं नूतनवत्सरः स्वदेशवनिताक्षेमाय सञ्जायताम्॥

-राधावल्लभः त्रिपाठी

मुख्यालयवार्ता

## समनुष्ठितः संस्कृतसप्ताहोत्सवः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ऐषमः संस्कृतसप्ताहोत्सवः अत्यन्तं वैभवेन आचरितः। २८.०७.२०१२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य सारस्वतसभागारे संस्कृतसप्ताहोत्सवस्यास्य उद्घाटनकार्यक्रमः प्रवृत्तः। अस्मिन्नेव दिने अपराह्णे 'कविसपर्या'-कार्यक्रमः संवृत्तः। अस्मिन् कविसपर्याकार्यक्रमे सुविख्यातः कविः आचार्यः रेवाप्रसादद्विवेदी समर्चितः। अवसरेऽस्मिन् विद्वांसः आचार्यरेवाप्रसादद्विवेदि-प्रणीतकाव्येषु सारस्वतचर्चामकुर्वन्। सत्रेऽस्मिन् इमे चर्चयितारः स्वाभिप्रायं प्राकटयन् - १. आचार्यः अभिराजराजेन्द्रमिश्रः, २. आचार्यः कमलेशदत्तत्रिपाठी, ३. आचार्यः रमेशकुमारपाण्डेयः ४. आचार्यः सदाशिवकुमारो द्विवेदी च। आचार्यरेवाप्रसादद्विवेदिनः काव्येषु राष्ट्रभक्तिः, मानववादः, विवेकवादः, कारुण्यम् इत्यादयो गुणा विशेषतः प्राप्यन्ते, कविश्च अत्यन्तं सहृदयः राष्ट्रप्रेमी मानवतावादी च वर्तते इति कश्चन सारविशेषः विद्वद्भिः प्रस्तुतः।

ततः २९.०७.२०१२ दिनाङ्के 'विद्वत्सपर्या'-कार्यक्रमे आचार्यदयानन्दभार्गवमहोदयस्य सम्मानः संस्थानकुलपतिना कृतः। आचार्यदयानन्दभार्गवस्य कृतीः आधृत्य आचार्यश्रीकृष्णशर्म-डा. सरोजकौशल-डा. रमाकान्तपाण्डेयप्रभृतयो विद्वांसः स्वाशयं प्राकटयन्। आचार्यभार्गवस्य उदारचिन्तन-दार्शनिकोच्चता- वैदुष्यादिगुणाः प्रामुख्येन गोष्ठ्यामस्यां विमृष्टाः विद्वद्भिः। तदनन्तरं ३०.०७.२०१२ दिनाङ्के 'संस्कृतपत्रकारसम्मेलनम्' आयोजितमभूत्। राष्ट्रियसंस्कृतसंस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये आचार्यरमाकान्तशुक्लस्य च संयोजकत्वे संस्कृतपत्रकारसम्मेलनमिदं प्रवृत्तम्। राष्ट्रस्य विविधप्रदेशेभ्यः संस्कृतपत्रकाराः कार्यक्रमेऽस्मिन् सम्मिलिताः अभूवन्। संस्कृतस्य संस्कृतपत्रकारितायाः च वर्तमानस्थितिविषये कार्यक्रमेऽस्मिन् कश्चन अपूर्व एव विमर्शः जातः। संस्कृतपत्रकारसम्मेलनेऽस्मिन् देशस्य विविधप्रान्तेभ्यः विंशत्यधिकाः संस्कृतपत्रकाराः विद्वांसश्च सम्मिलिताः अभवन्।



संस्कृत-सप्ताहकार्यक्रमस्य किञ्चन दृश्यम्

ततः ०१.०८.२०१२ तः ०३.०८.२०१२ दिनाङ्कावधौ दिल्लीप्रदेशस्य राष्ट्रियराजधानीक्षेत्रस्य च छात्राणां कृते विद्यालयस्तरे स्तोत्रपाठ-निबन्धलेखन-काव्यपाठादिविषये विविधाः स्पर्धाः समायोजिताः। इमाः स्पर्धाः हरिनगरस्थ-महाशयचुन्नीलालसरस्वतीबालमन्दिरे आयोजिताः अभवन्।

०२.०८.२०१२ दिनाङ्के अपराह्णे ०४.०० वादने नवदेहलीस्थ-राष्ट्रियसंग्रहालये संस्कृतदिवससमारोहः अत्यन्तं वैभवेन आचरितः। अवसरेऽस्मिन् स्वागतभाषणं प्रास्ताविकं च प्रस्तुवन् राष्ट्रियसंस्कृतसंस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः विश्वसंस्कृतसम्मेलनस्य भारते सफलमायोजनं संस्थानेन सम्पादितान् उपक्रमान् च प्रामुख्येन चर्चितवान्। संस्थानेन विधास्यमानाः परियोजनाः उपक्रमाश्च अत्र तेन समुपस्थापिताः। ततः देहलीसर्वकारस्य मान्यः मन्त्री डा. रमाकान्तगोस्वामिवर्यः विशिष्टातिथित्वेन सम्बोधयन् संस्कृतस्य संवर्धनस्य आवश्यकतां प्रतिपादितवान्।

अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेन च नूतनतया मुद्रापितानां ग्रन्थानां लोकार्पणमपि जातम्। अत्र संस्कृतवार्तायाः षोडशोऽङ्कः अपि लोकार्पितः। अत्र इमे ग्रन्थाः लोकार्पिताः अभवन् -

१. वराहमिहिराचार्यविरचिता **बृहत्संहिता** योगीश्वरकृतया उत्पलपरिमलाव्यख्यया समेता


कविसपर्या-कार्यक्रमे भाषमाणः आचार्यरेवाप्रसादद्विवेदी

(द्वितीयो भागः),२. **सप्तशतीसङ्ग्रहः** पं. प्रेमनारायणद्विवेदिरचनावलिः (द्वितीयो भागः), ३. आचार्य-वसुबन्धु-प्रणीतः **अभिधर्मकोशः**, ४. **आचार्य रामचन्द्र द्विवेदी की रचनाएँ**, ५. सुगतकविरत्नविरचितं **भीमाम्बेडकरशतकम्**, ६. **शिखरिणी** – प्रणेता अभिराजराजेन्द्रमिश्रः, ७. **संस्कृतविमर्शः** (अङ्कः – ७), ८. **संस्कृतवार्ता** (अङ्कः – १६)।

इलाहाबादस्थ-गङ्गानाथझापरिसरात् प्रकाशिताया विवरणात्मिकायाः हस्तलिखितग्रन्थसूच्या नैके खण्डा अपि लोकायाऽर्पिताः। ते यथा–

तृतीय-खण्डः पुराणेतिहासः, चतुर्थ-खण्डः ज्योतिषशास्त्रम्, पञ्चम-खण्डः धर्मशास्त्रम्, षष्ठ-खण्डः व्याकरण-शिक्षा-निरुक्तकोशः, सप्तम-खण्डः तन्त्र-मन्त्र-यन्त्राणि, अष्टम-खण्डः श्रौतसूत्र-श्रौतप्रयोग-गृह्यप्रयोगाः, नवम-खण्डः स्तोत्रम्, दशम-खण्डः व्रत-पूजा-आयुर्वेदाः, एकादश-खण्डः दर्शनशास्त्रम्, प्रथम-भागः सांख्य-योग-न्यायानि, द्वादश-खण्डः, अनुपूरकम्।

संस्थानस्य अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनपरियोजनाङ्गतया मुद्रापितानि प्रकाशनानि अपि कार्यक्रमे लोकार्पितानि अभवन् –

१. जम्बुनाथविरचितः **प्रश्नसारसमुद्रः**, २. उदयङ्करविरचिता **परिभाषाप्रदीपार्चिः**, ३.माधवदेवकृता तर्कभाषाव्याख्या **सारमञ्जरी**, ४. चन्द्रदत्तविरचितं **भगवद्भक्तिमाहात्म्यम्**, ५. उमामहेश्वरविरचिता **तत्त्वचन्द्रिका**।

ततः संस्थानेन प्रारब्धः संस्कृतसेवाव्रतिसम्मानः संस्कृतेतरक्षेत्रेषु सन्तोऽपि संस्कृतस्य विकासाय प्रयत्नरतेभ्यः प्रदत्तोऽभवत्। एकलक्षरुप्यकात्मकराशिना राङ्कवपुष्पगुच्छाभ्यां च सह अयं पुरस्कारः अधोनिर्दिष्टेभ्यः संस्कृताराधकेभ्यः प्रदत्तोऽभवत्–

१. श्रीमते गोपालमित्राय, २. श्रीमते प्रशान्तमिश्राय, ३. श्रीमते वेदप्रकाशशर्मणे श्रीमत्यै मञ्जुशर्मणे च (संयुक्तरूपेण)।

तदनन्तरं श्रीगोपालमित्र-प्रशान्तमिश्रौ स्वाभिप्रायं प्रकटितवन्तौ। ततः कार्यक्रमस्य मुख्यातिथित्वेन समागतः श्रीपवनसिंहघाटोवरः स्वीयभाषणे संस्कृतस्य विकासविषये स्वीयाशयं प्राकटयत्। ततः पद्मभूषणसत्यव्रतशास्त्रिमहोदयः अध्यक्षीयोद्बोधनमकरोत्। कार्यक्रमान्ते संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडु धन्यवादज्ञापनमकरोत्।

६.०८.२०१२ दिनाङ्के संस्कृतसप्ताहोत्सवस्य समापनावसरे संस्थानेन नूतनतया निर्मितस्य 'अध्वर्युः' इति सभामण्डपस्य लोकार्पणं श्रीलालबहादुरशास्त्रियसंस्कृतविद्यापीठस्य कुलाधिपतिना न्यायमूर्तिना श्रीमुकुन्दकामशर्मणा कृतम्। ततः अस्मिन्नेव मण्डपे संस्कृतसप्ताहस्य कार्यक्रमं सम्बोधयता तेन आशा प्रकटिता यत् नातिविलम्बेन राष्ट्रियसंस्कृतसंस्थानं केन्द्रीयविश्वविद्यालयो भवेदिति। कार्यक्रमस्य अध्यक्षः आचार्यः राधावल्लभत्रिपाठी वर्तमानयुगं संस्कृतस्य स्वर्णिमयुगं कथयन् संस्कृतस्य विकासाय नैकान् उपायान् उपास्थापयत्। संस्कृतसप्ताहाङ्गतया समायोजितासु विविधविद्यालयीयस्पर्धासु दिल्लीराज्यस्य ११२ विद्यालयानां पञ्चशताधिकच्छात्राः भागमवहन्। स्पर्धासु विजेतृच्छात्रेभ्यः पुरस्काराः प्रदत्ताः अभवन्। कार्यक्रमसंयोजिका डा. शुक्लामुखर्जी प्रतिवेदनं प्रास्तौत्। कार्यक्रमान्ते डा. गोपीरमणमिश्रः धन्यवादज्ञापनमकरोत्। इत्थं संस्कृतसप्ताहोत्सवः भव्यतया आयोजितः राष्ट्रियसंस्कृतसंस्थानेन।




संस्कृतदिवससमारोहे मञ्चासीनाः विद्वांसः







संस्कृतसेवाव्रति-सम्मानं प्राप्नुवन्तः (क्रमशः) गोपालमित्रः, प्रशान्तमिश्रः, वेदप्रकाशशर्मा-मञ्जुशर्मा च




संस्कृतसप्ताहाङ्गतया आयोजितस्पर्धासु विजेतृभ्यः पुरस्कारं प्रायच्छन्तः कुलपतिप्रमुखाः

## संवृत्तः त्रिचत्वारिंशः स्थापनादिवसोत्सवः




स्थापनादिवससमारोहे समुपस्थिताः विद्वांसः

१५.१०.२०१२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य त्रिचत्वारिंशः स्थापनादिवसोत्सवः सोल्लासं समपद्यत। अवसरेऽस्मिन् संस्थानस्य सारस्वतसभागारे कश्चन कार्यक्रमः समायोजितो जातः। दीपप्रज्ज्वालनेन सरस्वतीसमर्चनया च कार्यक्रमोऽयं समारब्धः। अध्यक्षत्वेन आचार्यः राधावल्लभत्रिपाठी, मुख्यातिथित्वेन आचार्यः अभिराजराजेन्द्रमिश्रः, विशिष्टातिथित्वेन आचार्या दीक्षितपुष्पा आचार्यः रमाकान्तशुक्लः च आसन्। अतिथिस्वागतानन्तरं आध्यक्षीयोद्बोधने राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी अकथयद् यत् संस्कृतशिक्षाया अभ्युन्नतये भारतशासनं १९७० तमे ख्रिस्ताब्दे राष्ट्रियसंस्कृतसंस्थानं स्थापयामास। तत आरभ्य संस्कृतशास्त्रपरम्परां सुरक्षन्ती संरक्षन्ती सम्पोषयन्ती समेधयन्ती चेयं संस्था अखिलभारतीयस्वरूपमादधती सम्प्रति विश्वस्मिन् लब्धप्रतिष्ठा वर्तते। तेन अभिहितं यद् वर्तमानकाले संस्कृतशिक्षोत्कर्षाधायकाः यावन्तः प्रकल्पाः यावत्यः योजनाश्च दृग्गोचर्यः सन्ति, ता अनेनैव राष्ट्रियसंस्कृतसंस्थानेन सञ्चाल्यमानाः वर्तन्ते। विशेषतया विगतेभ्यः चतुर्भ्यः वर्षेभ्यः संस्थानेन नैका अभिनवप्रकल्पाः समुद्घाटिताः। संस्कृतपत्रकारिता-नाट्यशास्त्र-आङ्ग्लहिन्दीसंस्कृतानुवाद-प्रभृतिपाठ्यक्रमाः, पालि-प्राकृत-विकास-परियोजना, विविधभाषाकोशपरियोजना, ई-टेक्स्टनिर्माणपरियोजना, ई-ग्रन्थालयनिर्माणपरियोजना, मुक्तस्वाध्यायपीठम् इत्यादिनव्याः कार्यक्रमाः संस्कृतशिक्षणपरिदृश्ये नवास्सरण्यः उद्भाव्य संस्कृतस्य प्रत्यग्रत्वमवितथीकुर्वन्ति। अग्रे सः समबोधयत् यत् विविधैः राष्ट्रिय-अन्ताराष्ट्रियसम्मेलनैस्सह विश्वसंस्कृतपुस्तकसम्मेलनं, विश्वसंस्कृतसम्मेलनम् इत्यादिकार्यक्रमान् सफलतया सञ्चाल्य वैश्विकस्तरे संस्थानेन आत्मनः भारतस्य च कीर्तिः अभ्रंल्लिहा अकारि। कुलपतिना संसूचितं यत् बहुपरिसरात्मकं सर्वाधिकसंस्कृतच्छात्रसमन्वितम् इदं राष्ट्रियसंस्कृतसंस्थानं प्रायः सहस्रपरिमिताभ्यः शिक्षण-शोधसंस्थाभ्यः अनुदानं प्रयच्छत् विश्वे अप्रतिमं वरीवर्ति।




हिन्दीपक्षोत्सवाङ्गतया आयोजितस्पर्धासु विजेतृभ्यः पुरस्कारान् प्रयच्छन् कुलपतिः

कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण विराजमानः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यराजेन्द्रमिश्रः अवोचत् यत् संस्कृतभाषायाः अभ्युदयाकाशे संस्थानसूर्यस्य समुदयेन सर्वोऽपि संस्कृतविषयकः अन्धकारः स्वयमेव व्यपगतः। ये खलु मृतभाषेयं जटिलभाषेयं वर्गविशेषस्य भाषेयं व्याकरणभाषेयं अयुवानुकूलभाषेयम् इति विविधैर्दुर्वादैः प्राक् निन्दापरायणा आसन्, तेषां समेषाम् अकारणवैरिणां बुद्धिशुद्धिं साधयत् इदं संस्थानं कस्यचित् नूतनयुगस्य प्रारम्भं समपादयत्। अग्रे तेनैवम् उद्घोषितं यत् संस्कृताङ्गमङ्गीकृतानां कुलपतिवर्याणाम् आचार्यराधावल्लभत्रिपाठिनाम् उर्वरकल्पनया अहर्निशपरिश्रमेण च इदं संस्थानं चतुर्भ्यः वर्षेभ्यः विश्वसंस्कृतसम्मेलनप्रभृतिनैकानाम् अन्ताराष्ट्रिय-राष्ट्रियसम्मेलनानां सर्वोपादेयानाम् अभिनवपाठ्यक्रमाणाञ्च सञ्चालनं विधाय आत्मानं बृहत्तमं स्वरूपं जगत्समक्षम् अस्थापयत्।

कार्यक्रमे विशिष्टातिथिरूपेण उपस्थिता राष्ट्रपतिसम्मानिता विदुषी पुष्पादीक्षितमहाभागा समवदत् यत् राष्ट्रमिदं भारतस्य क्वचिद् धर्ममाश्रित्य क्वचिद् जातिमाश्रित्य क्वचिद् क्षेत्रमाश्रित्य क्वचित् भाषामाश्रित्य विभज्यमानं दृश्यते। इमे विवादा अनन्ताः। एतेषां विवादानां शमोपाय एक एव वर्तते। संस्कृतमेवास्ति तादृशं किमपि सूत्रं येन राष्ट्रमिदं परस्परं निबद्धुं शक्यते। अतः राष्ट्रियसंस्कृतसंस्थानमिदं संस्कृतस्य संरक्षणेन परिवर्धनेन नानाविधैरुपायैश्च राष्ट्रैक्यं विधातुं जनानां मानसञ्च संस्कर्तुम् अहर्निशं यतते। कुलपतिमहाभागाः नक्तं दिवं तादृशानुपायान् चिन्तयन्ति यैः विश्वस्य मानसं भवेत् संस्कृतेन संस्कृतम्।




संस्कृतानुवादलेखनकार्यशालायाः किञ्चन दृश्यम्

अवसरेऽस्मिन् विशिष्टातिथिरूपेण विराजमानः देहलीस्थ-देववाणीपरिषदः महासचिवः डा. रमाकान्तशुक्लः अकथयत् यत् २००८ ख्रिस्ताब्दात् विविधपरिसरेषु नूतनभवनानां निर्माणं, युवमहोत्सवः, विश्वसंस्कृतसम्मेलनं, विश्वविद्यालयानुदानायोगाधीन-राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा संस्थानस्य 'ए'-श्रेण्यां प्रत्यायनं मूल्याङ्कनम् इति विविधाभिः घटनाभिः राष्ट्रियसंस्कृतसंस्थानमिदं सातिशयां कीर्तिमलभत। अस्मिन्नेव कार्यक्रमे ६-१५.१०.२०१२ दिनाङ्केषु समायोजितायाः संस्कृतानुवादलेखनकार्यशालायाः समापनसमारोहोऽपि समायोजितः। कार्यशालायामस्यां देशस्य विविधेभ्यः प्रान्तेभ्यः समागताः विंशत्यधिकाः युवविद्वांसः विविधानां ग्रन्थानामनुवादमकुर्वन्। हिन्दीपक्षान्तर्गततया समायोजितासु स्पर्धासु विजेतारः अपि कार्यक्रमेऽस्मिन् पुरस्कृताः जाताः।

मुख्यावार्ता




'अहम् ईक्षे' इति ग्रन्थलोकार्पणस्य किञ्चन दृश्यम्

मुख्यालयवार्ता

## आधुनिकसंस्कृतसाहित्य-पुस्तकालयस्य 'अहम् ईक्षे' इति ग्रन्थस्य च लोकार्पणकार्यक्रमः







'आधुनिकसंस्कृतसाहित्य-पुस्तकालयः' इत्यस्य अन्तर्जालपुटस्य लोकार्पणस्य दृश्यम्

२३.१०.२०१२ दिनाङ्के नवदेहल्यां लोधीमार्गस्थ-चिन्मयमिशनाख्ये भवने मानवसंसाधनविकासमन्त्रिचराणां, सञ्चारसूचना-प्रौद्योगिकीमन्त्रिणां किञ्च राष्ट्रियसंस्कृतसंस्थानस्य कुलाध्यक्षचराणां प्रणीतस्य 'आइ विटनेस' इत्याख्यस्य आंग्लकाव्यसङ्कलनात्मकस्य ग्रन्थस्य संस्कृतानुवादरूपः 'अहम् ईक्षे' इति नामको ग्रन्थः लोकार्पितो जातः। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः आचार्याः राधावल्लभत्रिपाठिमहोदयाः अस्य ग्रन्थस्य संस्कृतानुवादमकुर्वन्। अस्य ग्रन्थस्य लोकार्पणं सांसदाः भारतीयसांस्कृतिकसम्बन्धपरिषदोऽध्यक्षाश्च डा. कर्णसिंहमहोदयाः अकुर्वन्। दिल्लीविधानसभायाः अध्यक्षाः डा. योगानन्दशास्त्रिणः परिवहन-निर्वाचन-न्याय-कानूनमन्त्रिणः डा. रमाकान्तगोस्वामिनः च ग्रन्थस्य विषये स्वाभिप्रायं प्रस्तुतवन्तः। ततः श्रीकपिलसिब्बलमहोदयाः मूलानाम् आंग्लकाव्यानां पाठम् आचार्याः राधावल्लभत्रिपाठिनः अनूदितकाव्यानां च पाठं कृतवन्तः। कार्यक्रमस्य समायोजनं न्यूभारतीयबुककारपोरेशनस्य सुभाषदीपकजैनाभ्यां कृतम्।

अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन सज्जीकृतस्य 'आधुनिकसंस्कृतसाहित्य-पुस्तकालयः' इति नामधेयस्य अन्तर्जालपुटस्य लोकार्पणमपि जातम्।

## प्रत्यायनप्रमाणपत्रसमर्पणकार्यक्रमः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणदलैः राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयस्य तदनन्तर्गतदशपरिसराणां च निरीक्षणं ०९-२६ अप्रैल, २०१२ इत्यवधौ कृतमासीत्। राष्ट्रियसंस्कृतसंस्थानं निरीक्षणानन्तरं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए'-श्रेण्या चतुर्षु अङ्केषु ३.२५ अङ्कान् दत्वा प्रत्यायितम्। बेङ्गलूरुनगरे १६.०९.२०१२ दिनाङ्के राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः प्रत्यायनप्रमाणपत्रसमर्पणकार्यक्रमे तत्रत्यैः अधिकारिभिः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतये आचार्याय राधावल्लभत्रिपाठिने प्रत्यायनप्रमाणपत्रं प्रदत्तम्। विश्वविद्यालयानुदानायोगस्य अध्यक्षः श्रीवेदप्रकाशः राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निदेशकः श्रीरङ्गनाथन् च कुलपतये प्रशस्तिपत्रं समार्पयताम्।




प्रत्यायनप्रमाणपत्रं प्राप्नवन् कुलपतिः आचार्यः राधावल्लभत्रिपाठी



सङ्गोष्ठ्याः उद्घाटनभाषणं कुर्वन् कुलपतिः

## पञ्चतन्त्रविषये अन्ताराष्ट्रिया सङ्गोष्ठी

विभिन्नसंस्कृतिषु विभिन्नेषु अनुशासनप्रस्थानेषु पञ्चतन्त्रस्य वैश्विकीं भूमिकां विशदीकर्तुम् अन्ताराष्ट्रियं सम्मेलनमेकं लाइपजिगनगरे २७ सितम्बर, २०१२ दिनाङ्के आरब्धम्। सेक्सोनियन एकेडेमी आफ साइंस एंड ह्यूमेनिटी इति संस्थया भारतीयसांस्कृतिकसम्बन्धपरिषदः लाइपजिगविश्वविद्यालयस्य भारतीयविद्यैशियनाध्ययनसंस्थानस्य सहयोगेन आयोज्यमानस्य सम्मेलनस्यास्य उद्घाटनसत्रे भाषमाणः राधावल्लभः त्रिपाठी पञ्चतन्त्रस्य विश्वसंस्कृतेर्निमाणे भूमिकां विशद्य प्रत्यपादयत्।

२७.०९.२०१२ दिनाङ्के एव भारतीयसांस्कृतिकसम्बन्धपरिषदा सञ्चालितस्य टैगोर-सेण्टर इत्यस्य निदेशकः प्रो. शिवप्रसादोऽपि अस्मिन्नवसरे स्वमन्तव्यमभिव्यानक्। समायोजितेषु शैक्षणिकसत्रेषु कमलेशदत्तः त्रिपाठी, राजेन्द्रमिश्रः, सी. राजेन्द्रन्, राधावल्लभत्रिपाठी चेतीमे भारतीया विद्वांसा स्वं स्वं शोधपत्रं प्रस्तुतवन्तः।

# युवमहोत्सवः सोत्साहं सम्पन्नः

राष्ट्रियसंस्कृतसंस्थानेन आचतुर्भ्यः वर्षेभ्यः अन्तःपरिसरीयस्पर्धारूपः युवमहोत्सवः महता उत्साहेन समायोज्यते। ऐषमः पञ्चमो युवमहोत्सवः भोपालपरिसरे ३०.१०.२०१२तः ०२.११.२०१२ पर्यन्तं समाचरितः। ३०.१०.२०१२ दिनाङ्के अस्य महोत्सवस्य उद्घाटनकार्यक्रमः समायोजितः आसीत्। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन मध्यप्रदेशराज्यस्य महामहिमो राज्यपालः श्रीरामनरेशयादवः, विशिष्टातिथित्वेन मध्यप्रदेशविधानसभायाः प्रतिपक्षनेता श्री अजयसिंहः, अध्यक्षत्वेन आचार्य राधावल्लभत्रिपाठी च सभां व्यभूषयन्।



युवमहोत्सवस्य उद्घाटनसत्रस्य दृश्यमेकम्

३०.१०.२०१२ तः ०२.११.२०१२ पर्यन्तं युवमहोत्सवेऽस्मिन् विविधाः स्पर्धाः समायोजिताः आसन्। तासु स्पर्धासु शैक्षिकस्पर्धान्तर्गततया संस्कृतसुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचना सङ्गणकीयस्पर्धा च आसन्। चित्रस्पर्धायाम् इमाः स्पर्धा आसन्- आशुचित्रणं, व्यङ्ग्यचित्रं, भित्तिपत्रकं, रङ्गवल्ली च। सांस्कृतिकस्पर्धासु एककसंस्कृतगीतम्, एककशास्त्रीयगानम्, एककशास्त्रीयवादनम्, एककशास्त्रीयनृत्यम्, एकपात्राभिनयः, संघनृत्यं (केवलं बालिकानां कृते) चेति स्पर्धाः समायोजिताः आसन्। क्रीडास्पर्धासु योगासनं, धावनं, दीर्घकूर्दनम्, उच्चकूर्दनं, गोलकक्षेपणं, चक्रक्षेपणं, कुन्तक्षेपणं, बैडमिण्टन, हस्तकन्दुकं, मल्लयुद्धं, कबड्डी, चतुरङ्गं, खो-खो इतीमाश्च स्पर्धाः आयोजिताः आसन्।



शोभायात्रायाः किञ्चन दृश्यम्

०२.११.२०१२ दिनाङ्के अस्य युवमहोत्सवस्य समापनसमारोहः समायोजितः। अस्मिन् समापनसमारोहे मुख्यातिथित्वेन भारतशासनस्य कृषिराज्यमन्त्री डा. चरणदासमहन्तः, सम्मानिताथित्वेन भारतशासनस्य ग्रामीणविकासराज्यमन्त्री श्रीप्रदीपजैनः 'आदित्यः', विशिष्टातिथित्वेन पूर्वपुलिसमहानिदेशकः श्री-सुभाषचन्द्रत्रिपाठी सारस्वतातिथित्वेन भोपालस्थ-बरकत-उल्लाह-विश्वविद्यालयस्य कुलपतिः प्रो. निशा दूबे मञ्चासनं शोभितवन्तः। कार्यक्रमस्य आध्यक्ष्यं राष्ट्रियसंस्कृत- संस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी निर्व्यूढवान्। कार्यक्रमे अतिथयः स्वाभिप्रायं प्राकटयन्। अन्तः परिसरीये युवमहोत्सवे जयपुरपरिसरः प्रथमं, श्रीराजीवगान्धी( शृङ्गेरी)-परिसरः द्वितीयं के.जे. सोमैया-संस्कृतविद्यापीठं तृतीयस्थानं च अलभन्।



विजयवैजयन्तीपुरस्कारभाक् जयपुरपरिसरगणः

इत्येवम् ऐषमः युवमहोत्सवः अतीव उत्साहेन सम्पन्नः। अस्य युवमहोत्सवस्य साफल्ये आचार्यः के.बी.सुब्बरायुडुः, डा. शुक्लामुखर्जी आचार्यः आजादमिश्रः च विशिष्टां भूमिकां निरवहन्।

**क. शैक्षिकस्पर्धा**

१. संस्कृतसुभाषितकण्ठपाठस्पर्धा - रागिनीशर्मा-मनीषाआर्ये, सुब्रह्मण्यशास्त्रि-पुरुषोत्तमदासौ, गौरवात्रि-सुब्रतषडङ्गिनौ (प्रोत्साहनम्-धर्मवतीआर्या-अतुलद्विवेदिनौ)

२. वादविवादस्पर्धा (पक्षे) - कलाधरभट्टः, मनीषजुगरानः, आशा ई.-सौम्यरञ्जनषडङ्गिनौ

वादविवादस्पर्धा (विपक्षे) - नवीनभट्टः, नरेशकुमारशर्मा, गौरवः

३. स्फूर्तिस्पर्धा - विनोदकुमारशर्म-मुरलीधरपालीवालौ, वीरेन्द्रसिंह-रमेशचन्द्रनैलवालौ, मोनिकाबल्ला-राजेशरतौडिनौ

४. साहित्यरचनास्पर्धा - मोनिकाबल्ला, मधुसूदनशर्मा, विनायकभट्टः (प्रोत्साहनम्-सन्दीपोनियालः, अभिषेकतिवारी, पूर्णचन्द्रत्रिपाठी)

५. सङ्गणकीयसंस्कृतस्पर्धा - अभिषेकतिवारी, प्रीतमकुमारः, विद्यासागरः

**ख. चित्रस्पर्धा**

१. आशुचित्रणम् - नम्रताठक्कर, विनयः एच.वी., सौरभगौतमः (प्रोत्साहनम्-भीमराजः, ज्योतिरञ्जन)

२. व्यङ्ग्यचित्रम् - मानसरञ्जनः, ज्ञानेश्वरकोशितः, धर्मेन्द्रशर्मा (प्रोत्साहनम्-अकलेशकुमारजैनः, मानवी, मुरलीमाधवः)

३. भित्तिपत्रकम् - नम्रताठक्कर, मानसरञ्जनसाहू, विनयः एच.वी. (प्रोत्साहनम्-धर्मेन्द्रशर्मा, ललितविजयः)

४. रङ्गवल्ली - जागृतिपाठकः, नम्रताठक्कर, श्रीवल्ली एम.हेगडे

**ग. सांस्कृतिकस्पर्धा**

१. एककसंस्कृतगीतम् - अतुलकुमारद्विवेदी, श्रीरञ्जिनी के., भावना

२. एककशास्त्रीयगानम् - मीरा पी.एम., पवनकुमारपराशरः, ब्रजेशकश्यपः

३. एककशास्त्रीयवादनम् - राजेशकालौनी, अभिषेकशर्मा, ऋषिकेशः टी.एस.

४. एककशास्त्रीयनृत्यम् - स्नेहा यू.पी., भाग्यश्रीश्रीचन्दन, रञ्जिनी के.
५. एकपात्राभिनयः - कलाधरभट्टः, ब्रिल्ली के.जे., पुरुषोत्तमदासः
६. सङ्घनृत्यम् (बालिकानां) - श्रीवेदव्यासपरिसर-जयपुरपरिसरौ, श्रीराजीवगान्धीपरिसरः, गुरुवायूरपरिसरः (प्रोत्साहनम्-श्रीसदाशिवपरिसरः)

**घ. क्रीडास्पर्धा**

१. योगासनस्पर्धा (बालकानां) - शुभम्, सञ्जय-आर्यः, रत्नेशकुमारत्रिपाठी
योगासनस्पर्धा (बालिकानां)- बेलाविदुषी, सुनीताभट्ट, अन्तिमबालाजैन
२. १०० मीटरधावनम् (बालकानां) - परमानन्दशर्मा, भूपेन्द्रसिंहः, राजेन्द्रकुमारशर्मा
३. १०० मीटरधावनम् (बालिकानां) - तुषारा के.हेगडे, श्रीवल्ली बि., मैनाकुमारीशर्मा
४. २०० मीटरधावनम् (बालकानां) - भूपेन्द्रसिंहः, परमानन्दशर्मा, राजेन्द्रकुमारशर्मा
५. २०० मीटरधावनम् (बालिकानां) - तुषारा के.हेगडे, कमलादेवीदैरु, दीपिकाचौधरी
६. ४०० मीटरधावनम् (बालकानां) - राजेन्द्रकुमारशर्मा, परमानन्दशर्मा, जगन्नाथ-आर्यः
७. ४०० मीटरधावनम् (बालिकानां) - कमलादेवीदैरु, दीपिकाचौधरी, रश्मि एच.पी.
८. ८०० मीटरधावनम् (बालकानां) - सतवीरः, योगेशकुमारः, विक्रमः
९. १५०० मीटरधावनम् (बालकानां) - योगेशकुमारसहारनः, विक्रमः, रमेशः बि.सि.
१०. दीर्घकूर्दनम् (बालकानां) - भूपेन्द्रसिंहः, बिक्रमकिशनः, अखिलः ए.एस.
११. दीर्घकूर्दनम् (बालिकानां) - रेणुका, सुनीताभट्ट, दीपिकाचौधरी
१२. उच्चकूर्दनम् (बालकानां) - निरञ्जनभट्टः, ध्रुवः के., रणवीरचौधरी
१३. उच्चकूर्दनम् (बालिकानां) - उषा एल.हेगडे, रेणुका, दीपिकाचौधरी
१४. गोलकक्षेपणम् (बालकानां) - विकासकुमारः, हरीशकुमारः, शरतचन्द्रन् ई.टी.
१५. गोलकक्षेपणम् (बालिकानां) - श्रीरञ्जिनी के., रेणुका, सुमनदेवी
१६. चक्रक्षेपणम् (बालकानां) - रणवीरचौधरी, सत्यवीरसिंहः, शरतचन्द्रन्
१७. चक्रक्षेपणम् (बालिकानां) - रेणुका, मैनाकुमारीशर्मा, श्रीरञ्जिनी के.
१८. कुन्तक्षेपणम् (बालकानां) - प्रदीपकुमारः, धर्मेन्द्रः, जयन्तबारिकः
१९. एकक-बैडमिण्टन् (बालकानां) - श्रीजितः सि.आर., नवीनकुमारः
२०. एकक-बैडमिण्टन् (बालिकानां) - श्रीरञ्जिनी के., प्रियंका
२१. युगल-बैडमिण्टन् (बालकानां) - योगेन्द्र-नवीनकुमारौ, विवेकः आर्. हेगडे-गणेशः एस. हेगडे
२२. युगल-बैडमिण्टन् (बालिकानां) - श्रीरञ्जिनी के.-चन्दनः एस. हेगडे, दिव्याजोशी-उमे
२३. हस्तकन्दुकम् (बालकानां) - जयपुरपरिसरः(प्र.)-सोमेशकुमारशर्मा, सेदूप्रफुल्लअभेय-, अशोकशर्मा, विजयकुमारनाहरिया, सचिनजैन', जसवन्तकुमारयोगी, नरेन्द्रखोरेगांवः, हरीशशर्मा
श्रीराजीवगांधीपरिसर (द्वि.) - राजेन्द्र एम.भट्टः, कलाधरभट्टः, आदर्शकुमारः टि.ए., मञ्जुनाथहेगडे, आदर्शः बि.के., खेमराजः, ध्रुवः के., गणेशः एस. हेगडे
२४. मल्लयुद्धम् (५० कि.ग्रा.) - योगेशदाधीचः, आशीषः, सुमितकुमार-सुशान्तकुमारौ
२५. मल्लयुद्धम् (५५ कि.ग्रा.) - लीलाधरः, योगेशशरणः, अजयकुमार-अजमेशौ
२६. मल्लयुद्धम् (६० कि.ग्रा.) - प्रकाशः, मुकेशकुमारः, नवीन-गिरिराजौ
२७. मल्लयुद्धम् (६६ कि.ग्रा.) - विकासकुमारः, राजेन्द्रकुमारः, अरुणशर्मा-सनितगौडौ
२८. मल्लयुद्धम् (७४ कि.ग्रा.) - कुलदीपः, प्रदीपः, खेमराज-प्रेमशङ्करौ
२९. मल्लयुद्धम् (७४ कि.ग्रा. तः अधिकम्) - हरीशः, वाणीभाऊ, आशीष-चितरञ्जनौ
३०. कबड्डी - जयपुरपरिसरः (प्र.)- योगेशदाधीचः, योगेशकुमारः, सुभाषकालीरवाना, भीमराजः, हरीशकुमारः, सत्यवीरसिंहः, शैतानरामः, चितरञ्जनशर्मा, राजेन्द्रकुमारः
श्रीसदाशिवपरिसरः (द्वि.)- सूर्यनारायणमहापात्रः, बिक्रान्तकुमारराणा, शिवशङ्करपाणिग्रही, पूर्णचन्द्रदाशः, आलोकमल्लिकः, गोपालकृष्णमिश्रः, विश्वरञ्जनशतपथी, विश्वप्रकाशमहापात्रः, शुभाशीषदासः
३१. चतुरङ्गम् (बालकानां) - श्यामसुन्दरः, मुरलीधरपालीवालः, गोपालशर्मा
३२. चतुरङ्गम् (बालिकानां) - पूनमजेना, दिव्याशर्मा, पार्वती एम.
३३. खो-खो (बालिकानां) - श्रीराजीवगान्धीपरिसर (प्र.)- सुनीताभट्ट, विद्यावती वि.भट्ट, मेघा एस.भट्ट, निकिता जे. हेगडे, श्रीवल्ली एम. हेगडे, रश्मि एच.पी., कविता जि.भट्ट, हेमशवेनी के.एस., श्रीवल्ली, वसुधा के.एन. तुषारा के.हेगडे, उषा एल.हेगडे
श्रीवेदव्यासपरिसर (द्वि.)- मधू, कविता, आरती, नेहा, अनुराधा, सुकन्या, मानवी, सविता, पायल, भारती कपूर, पूजा, प्रतिभा।



## मुक्तस्वाध्यायपीठस्य प्रवेशोत्सवः ग्रन्थलोकार्पणमहोत्सवश्च संवृत्तः



मु.स्वा.पीठस्य प्रकाशनानि लोकार्पयन्त कुलपतिप्रमुखाः अतिथयः

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन १०.०९.२०१२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य सारस्वतसभागारे कश्चन विशिष्ट एव कार्यक्रमः समायोजितः। मुक्तस्वाध्यायपीठस्य नूतनसत्रारम्भत्वात् नूतनप्रवेशार्थिनां स्वागतपुरस्सरं परिचयो भवेदिति धिया प्रवेशोत्सवः समायोजितः। अवसरेऽस्मिन् पीठेन ग्रन्थलोकार्पणकार्यक्रमोऽपि सम्पादितः। कार्यक्रमेऽस्मिन् अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी, मुख्यातिथित्वेन इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालयस्य आचार्यः सी. आर. के. मूर्तिः, सारस्वतातिथित्वेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः आचार्यः अभिराजराजेन्द्रमिश्रः, विशिष्टातिथित्वेन राष्ट्रपतिसम्मानेन सम्मानिता विदुषी आचार्या पुष्पा दीक्षितमहोदया च आसन्। कार्यक्रमेऽस्मिन् इमे आचार्याः स्वाभिमतं प्राकटयन् यत् 'अस्मिन् यान्त्रिकप्रविधि युगे संस्कृताध्ययनस्य उत्कर्षे दूरस्थशिक्षायाः अतीव महत्त्वं वर्तते। उद्योगे संरतोऽपि यः कोऽपि दूरस्थशिक्षामाध्यमेन स्वीयसंस्कृताध्ययनं संवर्धयितुं शक्नोति। प्राचीनकाले शिष्यः गुरोः मुखात् शिक्षां प्राप्नोति स्म। साम्प्रतमपि यान्त्रिकप्रविधिम् उपयुज्य स्वाध्यायसामग्रीं च पठित्वा यः कोऽपि संस्कृतशास्त्रज्ञानं सम्पादयितुं शक्नोति। अस्यां प्रणाल्यां विशेषज्ञानां सेवां सर्वेऽपि स्वीकर्तुं शक्नुवन्ति इति अस्याः प्रणाल्याः काचित् विलक्षणता एव।' इत्येवम् आचार्याः इमां प्रणालीं बहु एव प्रशंसितवन्तः। ततः इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालयस्य निर्देशानुसारं विभिन्नसंस्कृतग्रन्थानां पाठ्यसामग्रीरूपग्रन्थाः लोकार्पिताः अभवन्। दूरस्थशिक्षापरिषदः अध्यक्षा डा. नलिनी ए.लेले संस्थानकुलसचिवः आचार्यः के. बी. सुब्बरायुडुः मुक्तस्वाध्यायपीठनिदेशकः आचार्यः रमाकान्तपाण्डेयश्च कार्यक्रमे स्वाभिप्रायं प्रकटितवन्तः।



प्रवेशोत्सवस्य दृश्यमेकम्

## संस्कृत-हिन्दीभाषानुवादकार्यशाला



संस्कृत-हिन्दी-भाषानुवाद-कार्यशालायाः किञ्चन दृश्यम्

मुक्तस्वाध्यायपीठेन अगस्त-मासस्य २१ दिनाङ्कतः ३० दिनाङ्कं यावत् दशदिनात्मिका संस्कृतहिन्दीभाषानुवाद-प्रमाणपत्रपाठ्यक्रमसम्बद्धा पाठलेखनकार्यशाला समायोजिता। अस्यां कार्यशालायां विषयविशेषज्ञत्वेन आचार्यः अभिराजराजेन्द्रमिश्रः (शिमला) आचार्यः प्रभुनाथद्विवेदी (वाराणसी) डा. सदाशिवकुमारद्विवेदी (वाराणसी) च समुपस्थिताः। कार्यशालायाः उद्घाटनं २१ दिनाङ्के अभूत्। स्वीये अध्यक्षीये भाषणे कुलपतिमहोदयेन आचार्यराधावल्लभत्रिपाठिमहोदयेन अभिप्रेतं यत् साम्प्रतम् अनुवादस्य महती भूमिका वर्तते, अतः पाठ्यक्रमे निर्धारिताः पाठाः प्रायोगिकाः भवेयुः, येन अध्येतारः लाभान्विताः भविष्यन्ति इति। कार्यक्रमेऽस्मिन् संस्थानस्य कुलसचिवः आचार्यः के.बी.सुब्बरायुडुः मुक्तस्वाध्यायपीठस्य निदेशकः डा. रमाकान्तपाण्डेयः, पाठ्यक्रमसंयोजकः डा.त.महेन्द्र, उपस्थिताः आसन्।

## साहित्ये व्याकरणे च राष्ट्रियपाठलेखनकार्यशाला

मुक्तस्वाध्यायपीठेन नवदेहल्यां साहित्ये व्याकरणे च दूरस्थशिक्षामाध्यमेन पाठ्यसामग्रीं सज्जीकर्तुम् एकविंशतिदिवसव्यापिनी राष्ट्रियपाठलेखनकार्यशाला समायोजिता। इयं कार्यशाला ०५.१२.२०१२ दिनाङ्कात् २५.१२.२०१२ दिनाङ्कं यावत् प्राचलत्। संस्थानकुलपतयः आचार्याः राधावल्लभत्रिपाठिनः कार्यशालायाः समुद्घाटनं कृतवन्तः। संस्थानस्य कुलसचिवः आचार्यः के. बी. सुब्बरायुडुः विदुषां स्वागतं कृतवान्। कार्यशालायामस्याम् आचार्य राजेन्द्रमिश्रः, प्रो. उमाशङ्करशर्मा 'ऋषिः', डा. रामकुमारशर्मा तथा च अन्ये ३५ विद्वांसः समायाताः। एभिः विद्वद्भिः प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षाच्छाणां कृते व्याकरणसाहित्यविषययोः ७०पाठाः लिखिताः। मुक्तस्वाध्यायपीठस्य निदेशकस्य डा. रमाकान्तपाण्डेयस्य मार्गदर्शने डा. रत्नमोहनझा अस्याः कार्यशालायाः संयोजनमकरोत्।



कार्यशालायां समुपस्थिताः विद्वांसः

**आगामिकार्यक्रमाः**

## सम्पत्स्यते चतुर्थः दीक्षान्तमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य चतुर्थः दीक्षान्तमहोत्सवः २१.०१.२०१३ दिनाङ्के सम्पत्स्यते। महोत्सवेऽस्मिन् माननीयो मानवसंसाधनविकासमन्त्री डा. मल्लिपूडि मङ्गपति पल्लं राजुमहोदयः आध्यक्ष्यं विधास्यन्ति। भारतसर्वोच्चन्यायालयस्य पूर्वन्यायाधीशाः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य च कुलाध्यक्षा डा. मुकुन्दकामशर्ममहोदयाः दीक्षान्तभाषणं करिष्यन्ति। संस्थानकुलपतयः आचार्यराधावल्लभत्रिपाठिनः स्वागतभाषणेन समागतानाम् आतिथ्यं सम्पादयिष्यन्ति। अत्र अधोङ्कित तालिकानुसारेण छात्राः उपाधिं प्राप्स्यन्ति-

| वर्षः | शास्त्री | आचार्यः | शिक्षाशास्त्री | शिक्षाचार्यः | विद्यावारिधिः |
|---|---|---|---|---|---|
| २०१० | १०६५ | ९६३ | ७३८ | ४६ | ३३ |
| २०११ | १०७३ | ११२० | ७४३ | ४४ | ३७ |
| २०१२ | १३२३ | ११२१ | ७३१ | ६१ | ३७ |
| योगः | ३४६१ | ३२०४ | २२१२ | १५१ | १०७ |

अवसरेऽस्मिन् आचार्य-पुल्लेल श्रीरामचन्द्रुडुमहोदयेभ्यः आचार्यरामशङ्करत्रिपाठिमहोदयेभ्यश्च विद्यावाचस्पतिः इति मानदोपाधिरपि दास्यते संस्थानेन।

## राष्ट्रियसंस्कृतपरिषद उपवेशनम्

राष्ट्रिय-संस्कृत-परिषदः प्रथमम् उपवेशनं नवदेहल्यां शास्त्रिभवने २२.०१.२०१३ दिनाङ्के मानव-संसाधनविकासमन्त्रिणः डा. एम. एम. पल्लं राजुवर्यस्य आध्यक्षे भविष्यति। परिषदियं भारतसर्वकारस्य संस्कृतसम्बद्धान् कार्यक्रमान् निर्धारणाय क्रियान्वनाय च मानवसंसाधनविकासमन्त्रालयेन घटिता वर्तते।

## भविष्यति कौमुदीमहोत्सवः

प्रतिवर्षानुसारम् अस्मिन् वर्षेऽपि राष्ट्रियसंस्कृतसंस्थानस्य अन्तःपरिसरीयनाट्यस्पर्धाभूतः 'कौमुदीमहोत्सवः' ०५-०७ फरवरी, २०१३ दिनाङ्केषु एल्.टी.जी. इति प्रेक्षागृहे नवदेहल्यां समायोजितो भविष्यति।

## अखिलभारतीया शास्त्रीया स्पर्धा भविष्यति श्रीवेदव्यासपरिसरे

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् अखिलभारतीया शास्त्रीया स्पर्धा समायोज्यते। ऐषमः ५१तमी अखिलभारतीया शास्त्रीया स्पर्धा हिमाचलप्रदेशे श्रीवेदव्यासपरिसरे ०२-०४ मार्च, २०१३ मिते काले समायोजिता भविष्यति। एतदर्थं राज्यस्तरीयाः शास्त्रीयस्पर्धा संस्थानस्य परिसरेषु समायोज्यन्ते समायोक्ष्यन्ते च।

## समायोक्ष्यते प्रथमः अखिलभारतान्तःसंस्कृतविश्वविद्यालययुवमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानेन १५.०३.२०१३तः १७.०३.२०१३ पर्यन्तं प्रथमः अखिलभारतान्तःसंस्कृतविश्वविद्यालयीयो युवमहोत्सवः समायोक्ष्यते। अयं युवमहोत्सवः गुवाहाटीनगरे आयोजितो भविष्यति। अस्मिन् युवमहोत्सवे राष्ट्रस्य संस्कृतविश्वविद्यालयानां छात्र्यः छात्राश्च भागं ग्रहीष्यन्ति। युवमहोत्सवेऽस्मिन् शैक्षिकस्पर्धाः क्रीडास्पर्धाः च समायोक्ष्यन्ते।

स्पर्धासु शैक्षिकस्पर्धान्तर्गततया संस्कृतसुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचना च भविष्यन्ति। चित्रस्पर्धायाम् आशुचित्रणं, व्यङ्ग्यचित्रं, रङ्गवल्ली च वर्तन्ते। सांस्कृतिकस्पर्धासु एककसंस्कृतगीतम्, एककशास्त्रीयगानम्, एककशास्त्रीयवादनम्, एककशास्त्रीयनृत्यम्, एकपात्राभिनयः, संघनृत्यं (केवलं बालिकानां कृते) चेति स्पर्धाः भविष्यन्ति। क्रीडास्पर्धासु योगासनं, धावनं, दीर्घकूर्दनम्, उच्चकूर्दनं, गोलकक्षेपणं, चक्रक्षेपणं, कुन्तक्षेपणं, बैडमिण्टन, हस्तकन्दुकं, मल्लयुद्धं, कबड्डी, चतुरङ्गं, खो-खो इतीमाश्च स्पर्धाः भविष्यन्ति।

अस्मिन् युवमहोत्सवे भागं गृहीतुं देशस्य समस्ताः संस्कृतविश्वविद्यालयाः समाहूयन्ते। विस्तृतविवरणार्थं संस्थानस्य जालपुटं (www.sanskrit.nic.in) द्रष्टुमर्हन्ति।



पण्डितपरिषद्व्याख्यानमालाकार्यक्रमस्य दृश्यमेकम्

## पण्डितपरिषद्व्याख्यानमाला सम्पन्ना

श्रीनगरे ०१.१०.२०१२तः ०३.१०.२०१२ पर्यन्तं सम्पन्ने ४६तमे अखिलभारतीयप्राच्यविद्यासम्मेलने राष्ट्रियसंस्कृतसंस्थानेन पण्डितपरिषद्व्याख्यानमालायाः समायोजनं कृतम्। कश्मीरविश्वविद्यालयस्य गान्धीभवनस्य मुख्यसम्मेलनकक्षे पण्डितपरिषद्-व्याख्यानमालाकार्यक्रमः त्रिष्वपि दिनेषु सम्पन्नः। सत्रशः व्याख्यानां विवरणमित्थं वर्तते –

**प्रथमसत्रम्** – ०१.१०.२०१२ दिनाङ्के प्रथमं सत्रं 'आधुनिकयुगे वेदान्तः ज्योतिषं च' इति विषमाधृत्य समायोजितमासीत्। तत्र पुनः इमे उपविषयाः आसन् – १. वेदान्तः नवीनं भौतिकशास्त्रं च, २. वेदान्तः सापेक्षता-सिद्धान्तश्च, ३. वेदान्तः आधुनिकदिक्कालविमर्शश्च, ४. ज्योतिषम् आधुनिकखगोलशास्त्रं च। अत्र चर्चयितारः इमे आसन् – १. आचार्यः सर्वनारायणझाः २. आचार्यः के. विश्वनाथशास्त्री, ३. आचार्यः विन्ध्येश्वरीप्रसादमिश्रः च। अस्य सत्रस्य अध्यक्षः राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः के.बी. सुब्बरायुडुः आसीत्।

**द्वितीयसत्रम्** – ०२.१०.२०१२ दिनाङ्के द्वितीयसत्रम् 'आधुनिकयुगे न्यायदर्शनम्' इति विषयमाधृत्य आयोजितमासीत्। तत्र उपविषयाः इत्थमासन् – १. नव्यन्यायस्य सङ्गणकयन्त्रोपायोज्याः कोटयः, २. न्यायदर्शनं पाश्चात्यतर्कशास्त्रं च। अत्र चर्चयितृषु इमे आसन् – १. डॉ. नवीनहोल्लाः, २. डॉ. के.इ. मधुसूदनन्, ३. आचार्यः वेङ्कटराम बी.वी. शास्त्री, ४. डॉ. सुब्राय वी. भट्टः च। अस्मिन् सत्रे अध्यक्षः आसीत् आचार्यः श्रीपादसुब्रह्मण्यशास्त्री।

**तृतीयसत्रम्** – ०३.१०.२०१२ दिनाङ्के तृतीय-सत्रं 'संस्कृतव्याकरणं नवीनाश्च भाषासिद्धान्ताः' विषयमाधारीकृत्य समायोजितमासीत्। अस्मिन् तृतीये सत्रे उपविषयाः आसन् – १. पाणिनिः चाम्स्की च २. यान्त्रिकानुवादाय संस्कृतव्याकरणम्, ३. व्याकरणाध्यापनस्य पाणिनीयः प्रविधिः च। तत्र इमे चर्चयितारः आसन् – १. आचार्यः आजादमिश्रः, २. आचार्यः अर्कनाथचौधरी, ३. डॉ. ललितकुमारत्रिपाठी, ४. आचार्यः गोपालकृष्णशास्त्री च। सत्राध्यक्ष्यं डॉ. दीक्षितपुष्पा महोदया निर्व्यूढवती।

## संस्कृतशिक्षानुसन्धानसर्वेक्षणे राष्ट्रिया सङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे ०५.०९.२०१२ तः ०७.०९.२०१२ दिनाङ्कं यावत् संस्कृतशिक्षानुसन्धानसर्वेक्षणम् इत्यस्मिन् विषये राष्ट्रिया शोधसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्याः उद्घाटनसत्रे अध्यक्षत्वेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरः आचार्यः श्रीधरवशिष्ठः अवोचत् यत् संस्कृतविश्वविद्यालयेषु शिक्षाशास्त्रविभागाः यदारभ्य प्रारब्धाः तदारभ्य एतादृशस्य सर्वेक्षणस्य आवश्यकता सर्वैः अनुभूयते स्म। उद्घाटनस्य मुख्यातिथित्वेन भाषमाणः प्रसिद्धः शिक्षाविद् आचार्यः बालकृष्णपासी अकथयत् यत् राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा भारतीयशिक्षानुसन्धानसर्वेक्षणानि कृतानि, परञ्च संस्कृतशिक्षाक्षेत्रे सर्वेक्षणमिदं अद्य महदावश्यकं वर्तते। विशिष्टातिथिरूपेण प्रसिद्धसाहित्यकारः आचार्यः रमेशदवे आसीत्। स्वागतभाषणं परिसरप्राचार्येण आचार्येण आजादमिश्रेण कृतम्। ततः संगोष्ठ्याः संयोजकः डा. नीलाभतिवारी आयोजनस्य उद्देश्यानि स्वकीये प्रास्ताविके भाषणे प्राकाशयत्। धन्यवादसमर्पणं शिक्षाशास्त्रविभागाध्यक्षेण आचार्येण परमेश्वरनारायणशास्त्रिणा कृतम्। सङ्गोष्ठ्यां पञ्चाशदाधिकविद्वद्भिः शोधपत्रवाचनं कृतम्। तेषु जम्मूपरिसरात् डा. नगेन्द्रनाथझा, डा. गोविन्दपाण्डेयः लखनऊपरिसरात् आचार्यः लोकमान्यमिश्रः, डा. कुलदीपशर्मा, जयपुरपरिसरात् आचार्यः सोहनलालपाण्डेयः, डा. पवनकुमारः, मुम्बईपरिसरात् डा. देवदत्तसरोदे, पुरीपरिसरात् डा. रमाकान्तमिश्रः, शृङ्गेरीपरिसरात् डा. हरिप्रसादः, भोपालपरिसरात् डा. वेदनारायणचौधरी, डा. हर्षकुमारः, रामानन्दसंस्कृतमहाविद्यालयात् डा. लक्ष्मीनारायणपाण्डेयः प्रभृतयः विद्वांसः प्रमुखाः आसन्।



कार्यशालायाः उद्घाटनं कुर्वन्तः अतिथयः

सङ्गोष्ठ्याः समापनकार्यक्रमे मुख्यातिथिरूपेण महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः मिथिलाप्रसादत्रिपाठी आशास्ते स्म यत् इयं संगोष्ठी संस्कृतशिक्षानुसन्धानक्षेत्राय नूतनमार्गोद्घाटनाय अलं स्यात्। कार्यक्रमे विशिष्टातिथिरूपेण संस्थानकुलसचिवः आचार्यः के.बी. सुब्बारायुडु अब्रवीत् यत् 'संस्कृतशिक्षानुसन्धानसर्वेक्षणम्' नाम्नी इयं परियोजना यस्याः अङ्गत्वेन संगोष्ठी समायोजिता संस्थानस्य महत्त्वपूर्णा परियोजना वर्तते, अनया भारते संस्कृतशिक्षायाः दशा दिशा च स्पष्टीभविष्यति। समापनकार्यक्रमस्य आध्यक्षं परिसरप्राचार्यः आचार्यः आजादमिश्रः निरवहत्। कार्यक्रमे संस्थानस्य परियोजना अधिकारी डा. शुक्लामुखर्जी अपि सम्बोधितवती। स्वागतभाषणम् आचार्येण प.ना.शास्त्रिणा कार्तज्ञ्यज्ञापनं डा. वेदनारायणचौधरिणा कृतम्। सङ्गोष्ठ्याः संयोजनं डा. नीलाभतिवारिणा विहितम्।

संगोष्ठ्यां द्वितीये दिवसे सन्ध्याकाले परिसरस्य नाट्यशास्त्रानुसन्धानकेन्द्रेण 'हास्यचूडामणिः' इति प्रहसनस्य अतीवरमणीया प्रस्तुतिः दत्ता। प्रहसनमिदं प्रसिद्धेन संस्कृतकविना वत्सराजेन रचितम्। प्रहसनं दृष्ट्वा विद्वांसः, छात्राः हास्यरसे निमग्नाः अभवन्। नाटकस्य निर्देशनं डा. सङ्गीता गुन्देचा अकरोत्।




हिन्दीपक्षोत्सवे काव्यपाठं कुर्वन् आचार्यः कृष्णदत्तपालीवालः

## हिन्दीपक्षोत्सवः संवृत्तः

राष्ट्रियसंस्कृतसंस्थाने ऐषमः हिन्दीदिवसकार्यक्रमः उत्साहेन समायोजितः। १४ सितम्बर, २०१२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थाने हिन्दीपक्षोत्सवस्य उद्घाटनकार्यक्रमः प्रवृत्तः। उद्घाटनकार्यक्रमेऽस्मिन् हिन्दीभाषायाः प्राचीनकाव्यानां पाठस्य कश्चन उपक्रमः संवृत्तः। आचार्यरमाकान्तशुक्लः स्वयंभूरचित-पउमचरिउ-पुष्पदन्तप्रणीत-महापुराण-विद्यापतिविरचित-कीर्तिलता-अवहट्ठ-प्रभृतीनां काव्यानां पाठमकरोत्। ततः आचार्यः कृष्णदत्तपालीवालः हिन्दीसाहित्यस्य प्रसिद्धानां कवीनां मार्मिकीनां कवितानां पाठमकरोत्। तेन कृतेन पद्माकर-भारतेन्दुहरिश्चन्द-अयोध्याप्रसादसिंह-हरिऔध-मैथिलीशरणगुप्त-माखनलालचतुर्वेदिनां कासाञ्चित् कवितानां पाठेन श्रोतृवर्गः मुग्धो जातः।

कार्यक्रमस्य अध्यक्षतामावहता संस्थानकुलपतिना कथितं यत् अयं प्राच्यकाव्यपाठकार्यक्रमः हिन्दीपक्षोत्सवे नूतनतया संयोजितः। संस्थानकुलसचिवः आचार्यः के.बी. सुब्बरायुडुः धन्यवादज्ञापनं कुर्वन् संस्कृत-पालि-प्राकृत-भाषाणां सङ्गमप्रवृत्तिं प्रशंसितवान्।

ततः पक्षेऽस्मिन् संस्थानकर्मचारिणां कृते स्वरचितकाव्यपाठ-गीतसङ्गीत-निबन्धलेखन-श्रुतलेखन-सुलेखन-आशुभाषण-वादविवाद-प्रश्नमञ्च-प्रभृतिस्पर्धाः समायोजिताः अभवन्।

## अखिलभारतीयप्राच्यविद्यासम्मेलने अध्यक्षत्वेन चितः आचार्यः राधावल्लभत्रिपाठी

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी २०१४ तमे वर्षे गुवाहाटीविश्वविद्यालये समायोक्ष्यमाणस्य ४७तमस्य अखिलभारतीयप्राच्याविद्यासम्मेलनस्य अध्यक्षत्वेन चितो वर्तते। श्रीनगरे सम्पन्ने ४६तमे अखिलभारतीयप्राच्यविद्यासम्मेलने अयं महोदयः निर्बाधतया चितो जातः। अस्मै अखिलभारतीयप्राच्यविद्यासम्मेलनस्य अध्यक्षाय संस्थानकुलपतये आचार्याय राधावल्लभत्रिपाठिने स्वागतम्।

## भारतीयविज्ञानसम्मेलने संस्थानस्य सहभागिता

भारतीय-विज्ञानपरम्परायाः प्रचार-प्रसाराय कटिबद्धया विज्ञानभारतीति संस्थया जलन्धरस्थ-लवली-प्रोफेशनल- विश्वविद्यालयस्य परिसरे अक्टूबर ११-१४ दिनाङ्केषु समायोजिते तृतीये भारतीयविज्ञानसम्मेलने संस्थानेन सहभागिता कृता। सम्मेलनाङ्गतया समायोजितायां विज्ञानप्रदर्शिन्यां राष्ट्रियसंस्कृतसंस्थानेन 'संस्कृतग्रन्थेषु निहितं विज्ञानम्' इत्याख्या प्रदर्शिनी आयोजिता। छात्रैः साकं "प्राचीनभारतीयं विज्ञानम्" इति विषयमवलम्ब्य 'परिचर्चा' अपि समायोजिता आसीत्। अत्र आचार्यः पी.सी. मुरलीमाधवः, श्रीवेङ्कटेशमूर्तिः, डा.त. महेन्द्रश्च उपस्थाय छात्रैः साकं परिचर्चामकुर्वन्। प्रदर्शिन्यां संस्थानप्रतिनिधिरूपेण श्री.वेङ्कटेशमूर्तिः, डॉ. महेन्द्रश्च उपस्थाय आगतेभ्यः प्रदर्शिन्याः विवरणमकुरुताम्।



संस्कृतग्रन्थेषु निहितं विज्ञानम् इति प्रदर्शिन्याः किञ्चन दृश्यम्

## राष्ट्रपतिसम्मानपत्राणि प्रदत्तानि

२०१० वर्षस्य २०११ वर्षस्य च राष्ट्रपतिसम्मानपत्रप्रदानकार्यक्रमः १९.६.२०१२ दिनाङ्के राष्ट्रपति भवने सम्पन्नः। तस्मिन् कार्यक्रमे उपस्थातुमशक्तानां राष्ट्रपतिसम्मानपत्रप्राप्तविदुषां सम्मानप्रमाणपत्राणि संस्थानप्रतिनिधिभिः तेषां गृहं गत्वा समर्पितानि। तत्सम्बद्धचित्राणि अत्र द्रष्टुं शक्यते–



डा. देवीप्रसादखण्डेरावखरवण्डीकरः




डा. जी.आर. रामचन्द्रशास्त्री



श्रीमती गौरी धर्मपाल



विद्वान् साम्बदीक्षितदामोदरोपाध्यायः



श्री वैद्यनाथरघुनाथ शास्त्रिगल



आचार्यः प्रताप वन्द्योपाध्यायः

## मुक्तस्वाध्यायपीठेन सञ्चाल्यमानपाठ्यक्रमेषु प्रविष्टानां छात्राणां संख्या

मुक्तस्वाध्यायपीठेन २०१२-१३ सत्रे आचार्यसेतुकक्षाः तथा फलितज्योतिषाचार्यकक्षाः प्रारब्धाः। पूर्वं व्याकरण-साहित्यविषययोः प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षाः फलितज्योतिषे च प्राक्शास्त्रि-शास्त्रिकक्षाः व्याकरणे साहित्ये ज्योतिषे च शास्त्रिसेतुकक्षाः प्राक्शास्त्रिसेतुकक्षाश्च प्रचाल्यन्ते स्म। अस्मिन् सत्रे मुक्तस्वाध्यायपीठस्य विभिन्नपाठ्यक्रमेषु ७७९ छात्राः प्रवेशम् अलभन्त। तद्यथा–

| कक्षाः | व्याकरणम् | साहित्यम् | फलितज्योतिषम् |
|---|---|---|---|
| शास्त्रिसेतुः | ३३ | ५७ | २९ |
| प्राक्शास्त्री-I | १० | ४४ | ६ |
| प्राक्शास्त्री-II | ८ | ३ | २ |
| शास्त्री-I | १२ | ८७ | १७ |
| शास्त्री-II | १७ | ९ | ५ |
| आचार्यसेतुः | १५ | ४७ | २२ |
| आचार्यः-I | २७ | १९५ | २० |
| आचार्यः-II | १९ | ५९ | - |

२०१०-११ सत्रे छात्राणां संख्या १४७ तथा २०११-१२ सत्रे ४०१ आसीत्। सम्प्रति मुक्तस्वाध्यायपीठस्य विभिन्नपाठ्यक्रमेषु १२३३ छात्राः पठन्ति। सर्वेषां विद्यार्थिनां स्वागतम्।

## अन्ताराष्ट्रिया बौद्धसाहित्यविषयिणी सङ्गोष्ठी संवृत्ता



सङ्गोष्ठ्याः उद्घाटनसत्रस्य दृश्यमेकम्

राष्ट्रियसंस्कृतसंस्थान-नवनालन्दामहाविहार-मुम्बईविश्वविद्यालयस्थदर्शनविभागानां सहयोगेन के.जे. सोमैयाबौद्धाध्ययनकेन्द्रेण ०५-०७ दिसम्बर, २०१२ इत्यवधौ 'बौद्धग्रन्थानां सन्दर्भे अन्तः सांस्कृतिकप्रसारः – समालोचनात्मकं संस्करणं, लिप्यन्तरणम् अनुवादश्च' इत्यस्मिन् विषये सप्तम-द्विवार्षिकी अन्ताराष्ट्रिया सङ्गोष्ठी मुम्बईस्थ-विद्याविहारे समायोजिता। ०५ दिसम्बर, २०१२ दिनाङ्के अस्याः सङ्गोष्ठ्याः उद्घाटनकार्यक्रमः सम्पन्नः। कार्यक्रमे थाइलैण्डस्थ-महाचुलालाङ्गकोर्णराजाविद्यालयविश्वविद्यालयस्य आचार्यः डा. फरमहा सोम्बुन फन्ना महोदयः अस्याः सङ्गोष्ठ्याः उद्घाटनमकरोत्। मुख्यातिथित्वेन मुम्बईविश्वविद्यालयस्य कुलपतिचरः डा. नरेशचन्द्रः समुपस्थितः आसीत्। हम्बर्गविश्वविद्यालयस्य तिब्बतीयाध्ययनविभागस्य आचार्यः डा. दोरजी- वाङ्गचुकमहोदयः बीजभाषणमकरोत्। अवसरेऽस्मिन् 'Buddhist Meditation : Text, Tradition and Practice' अपि च 'Reexamination of Sanskrit and Pali *(Inscriptions of South-East Asia)* इत्येतौ ग्रन्थौ अपि लोकार्पितौ अभवताम्। नवनालन्दामहाविहारस्य निदेशकः प्रो. रवीन्द्रपन्तः लखनऊपरिसरस्य बौद्धदर्शनविभागस्य अध्यक्षः आचार्यः विजयकुमारजैनश्च वेदिकामलमकुरुताम्।



सङ्गोष्ठ्यां समवेताः विद्वांसः

सङ्गोष्ठ्यामस्यां नैके अन्ताराष्ट्रियस्तरे लब्धख्याता विद्वांसः सम्मिलिता अभवन्। बौद्धग्रन्थानां साहित्यस्य विषये अत्र गभीरा चर्चा प्रवृत्ता, विद्वद्भिः शोधपत्राणि च प्रस्तुतानि।

०७.१२.२०१२ दिनाङ्के सङ्गोष्ठ्याः सम्पूर्तिसमारोहः प्रवृत्तः। अस्मिन् कार्यक्रमे आचार्यः वी.एन.झामहोदयः आध्यक्ष्यं निर्व्यूढवान्। नवदेहलीस्थ-तिब्बत-हाऊसस्य निदेशकः गेसे दोरजी दाम्बुलवर्यः समापनभाषणमकरोत्। समापनसत्रे के.जे. सोमैयाबौद्धाध्ययनकेन्द्रस्य अध्यक्षा डा. कल्पकम-शङ्करनारायणन् धन्यवादं प्रस्तुतवन्ती सहयोगिनां संस्थानां कार्तज्ञ्यं ज्ञापितवती। एतस्य कार्यक्रमस्य अङ्गतया सङ्गोष्ठ्यनन्तरं कृष्णागिरि(कन्हेरी)-अजन्ता-एलोरा-गुहानां दर्शनस्य कार्यक्रमोऽपि आयोजकैः समायोजितः।

## भारतीयसंस्कृतपत्रकारसंघस्य महाधिवेशनम्




सभां सम्बोधयन् पं. अनन्तगाडगीलः

३०.०७.२०१२ दिनाङ्के नवदेहल्यां भारतीयसंस्कृतपत्रकारसंघस्य प्रथमं महाधिवेशनं महता उत्साहेन सममान्यत। महाधिवेशनस्य उद्घाटनं कुर्वता राष्ट्रियसंस्कृतसंस्थान-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठयोः कुलपतिना आचार्यराधावल्लभत्रिपाठिनोक्तं यद् भारतीयसंस्कृतपत्रकारसंघस्य संघटनेन संस्कृत-पत्रकारितायै सम्भूय समुत्थानस्य अवसरः सुलभो भवेत्। तेनोक्तं यत् संस्कृतपत्रकारिता तेजस्विनी भूत्वा समाजस्य संस्कृतस्य चोपकारं कर्तुं क्षमा भविष्यति। संघस्य संस्थापकाध्यक्षेण डा. रमाकान्तशुक्लेन संस्कृतवार्ताभिकरणस्य आवश्यकता आकांक्षिता। अस्मिन्नवसरे देशस्य उडीशा-मध्यप्रदेश-गुजरात-उत्तरप्रदेश-मध्यप्रदेशादिप्रदेशेभ्य समागतेभ्यः सर्वेभ्यः संस्कृत पत्रकारेभ्यः स्वागतं व्याहरता दिल्लीस्थ-देववाणीपरिषदोऽध्यक्षेण आचार्य डा. इच्छारामद्विवेदेन परिषत्प्रकाशिता ग्रन्थास्तेभ्य उपायनीकृताः।

उद्घाटनानन्तरं संघस्य कार्यसमितेः उपवेशनम् अभूत् यत्र संघस्य अन्यतमस्य उपाध्यक्षस्य डा. जगदीशशर्मणः स्मृतौ एकमिनटसमयात्मकं मौनमाधृत्य तस्मै श्रद्धाञ्जलिः अर्पितोऽभूत् उपाध्यक्षपदे 'शोधप्रभा' सम्पादकः आचार्यरमेशकुमारपाण्डेयः मनोनीतोऽभवत्। संस्कृतपत्रकारसंघस्य महाधिवेशने परिचर्चासत्रे महाराष्ट्रप्रदेशात् 'शारदा'-पत्रिकायाः सम्पादकः किञ्च संघस्य संरक्षकः पं. अनन्तगाडगीलः, 'संस्कृत-भवितव्यम्' इत्यस्य साप्ताहिकस्य सम्पादकः डा. चन्द्रगुप्तवर्णेकरः, डा. लीनारस्तोगी च, उत्कलराज्यतः 'संस्कृतमन्दाकिनी'-'लोकसुश्री'तिपत्रिकयोः सम्पादकः डा. सदानन्ददीक्षितः, गुजरातप्रदेशादागतो 'देवसायुज्यम्' 'संस्कृतवर्तमानपत्रं' चेत्यनयोः पत्रिकयोः सम्पादकः डा. प्रफुल्लपुरोहितः, इलाहाबादतः समागतः 'कथासरित्'-'पद्यबन्धे'तिपत्रिकाद्वयस्य सम्पादकः डा. बनमालीविश्वालः, इन्दौरतः समागतः वैद्युदाणविकपत्रकारः डा. ओमजोशी, वाराणसीतः समागतः 'गाण्डीव'साप्ताहिकपत्रस्य सम्पादकः डा. हरिप्रसादाधिकारी, डा. रमेशचन्द्रपाण्डेयश्च, दिल्ल्या युवपत्रकाराः डा. चन्द्रभूषणझा-ऋषिराजपाठक-मुनिराजपाठक-सुशीलजोशी-युवराजभट्टराई-शशिपालशर्मादयः संस्कृतपत्रकारिताक्षेत्रे विद्यमानाः समस्याः तत्समाधानञ्चावलम्ब्य विचारितवन्तः।




प्रशिक्षणवर्गस्य उद्घाटनं कुर्वन्तः विद्वांसः

## अनौपचारिकसंस्कृतशिक्षकप्रशिक्षणवर्गः

अनौपचारिक-संस्कृत-शिक्षक-प्रशिक्षण-वर्गस्य योजनायां देशे सर्वत्र संस्कृतस्य व्यापकं प्रचार-प्रसारं साधयितुं राष्ट्रियसंस्कृतसंस्थानेन अनौपचारिकसंस्कृतशिक्षणपाठ्यक्रमाः सञ्चाल्यन्ते। एतदङ्गतया राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरे अनौपचारिकसंस्कृतशिक्षकप्रशिक्षणवर्गस्य कश्चन कार्यक्रमः प्रवृत्तः। ०६.०६.२०१२ तः २६.०६.२०१२ पर्यन्तं प्रचलितेऽस्मिन् एकविंशतिदिनात्मके वर्गे राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरपरिसरे ०६.०६.२०१२ दिनाङ्के परिसरप्राचार्यस्य आचार्यस्य एम्.ए. बाबुमहोदयस्य आध्यक्ष्ये कालिकटविश्वविद्यालयस्य भाषासङ्कायप्रमुखेन आचार्येण सि. राजेन्द्रन्महोदयेन दीपप्रज्ज्वालनपुरस्सरम् एकविंशतिदिनात्मक-आवासीयसंस्कृतशिक्षकप्रशिक्षणवर्गस्य समुद्घाटनं व्यधायि। कालटिविश्वविद्यालयस्य कुलपतिचरः आचार्यः एन्.पि. उण्णी संस्कृतभाषायाः गौरवमयं भविष्यमालोचयन् संस्कृतभाषासंरक्षणाय यूनः प्रैरयत्। परिसरप्राचार्यः आचार्यः एम्.ए. बाबुः संस्कृतशिक्षकप्रशिक्षणवर्गस्योद्देश्यान्यभ्यवदत्। अवसरेऽस्मिन् आचार्यः च.ल.ना. शर्मा स्वागतभाषणं, डा. एम.वी. नरेशन् कृतज्ञताज्ञापनं च अकुरुताम्। २६.०६.२०१२ दिनाङ्के अस्य समापनकार्यक्रमः प्रवृत्तः। राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः के.बी. सुब्बरायुडु कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन समुपस्थितः। अयं महोदयः गीर्वाणवाण्याः जयघोषमभिवदन् पितृभाषात्वेनेमां प्रत्यपीपदत्। आचार्यः एम्.ए. बाबुः अध्यक्षत्वेन सभां सभामुदबोधयत्। श्रीदोर्बलप्रभाकरशर्मा स्वरचितप्रोत्साहप्रदकवितावलिभिः प्रशिक्षणार्थिनां हृद्दीपान् उत्तेजयन् सभ्यान् प्रामोदयत्। मुख्यातिथिना आचार्येण के.बी. सुब्बरायुडुमहोदयेन प्रशिक्षणार्थिभ्यः प्रमाणपत्राणि प्रदत्तानि, उत्तरीयैश्च अतिथयः अभिनन्दिताः। श्री कू. वेङ्कटेशमूर्तिः धन्यवादवचांसि न्यवेदयत्। अनौपचारिकसंस्कृतशिक्षायाः शिक्षकप्रशिक्षणवर्गसमायोजकेन डा. सुब्रह्मण्यशर्मणा समापनसमारोहकार्यक्रमोऽयं सञ्चालितः। अन्ते राष्ट्रगानेन कार्यक्रमोऽयं साफल्यमविन्दत्।




समापनसमारोहस्य किञ्चन दृश्यम्

## राष्ट्रियशोधप्रविधि-पाण्डुलिपिविज्ञानकार्यशाला सम्पन्ना




कार्यशालायाम् उद्घाटनभाषणं कुर्वन् कुलसचिवः आचार्यः के.बी. सुब्बरायुडुः

राष्ट्रियसंस्कृतसंस्थानेन १७.११.२०१२तः ०१.१२.२०१२ यावत् गङ्गानाथ-झापरिसरे 'शोधप्रविधिः पाण्डुलिपिविज्ञानञ्च' इत्यस्मिन् विषये पञ्चदश-दिवसीया काचिद् राष्ट्रिय-कार्यशाला समायोजिता। तत्र संस्थानस्य वेदव्यासपरिसर-जयपुरपरिसर-रणवीरपरिसर-लखनऊपरिसर-श्रीसदाशिवपरिसर-भोपालपरिसर-नवदेहलीपरिसर-शृङ्गेरीपरिसर-गङ्गानाथझापरिसरेभ्यश्च सर्वमाहत्य ६६ शोधच्छात्राः प्रतिभागिरूपेण भागं गृहीतवन्तः।

१७.११.२०१२ दिनाङ्के परिसरे इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य वाराणसेयशाखायाः परामर्शदातुः विशिष्टविदुषः आचार्यस्य कमलेशदत्तत्रिपाठिनः आध्यक्ष्ये अस्याः राष्ट्रियकार्यशालायाः उद्घाटनसमारोहः समायोजितः। कार्यक्रमेऽस्मिन् संस्थानस्य कुलसचिवः आचार्यः के.बी. सुब्बरायुडुः मुख्यातिथिरूपेण उद्बोधितवान्। स्वागतभाषणे संयोजकेन किञ्च परिसरप्राचार्येण अस्याः कार्यशालायाः उद्देश्यादिविषये सूचनाः प्रदाय अतिथीनां स्वागतं विहितम्। ततः आचार्येण कमलेशदत्तत्रिपाठिना प्राच्यविद्यामनीषीणां शास्त्रीयशोधदृष्टिः कीदृशी भवति तथा संस्कृतानुसन्धानविधौ पाण्डुलिपीनां पाण्डुलिपिविज्ञानस्य च कीदृशी भूमिका वर्तते इत्यस्मिन् विषये आलोकपातः कृतः। मुख्यातिथिना आचार्येण सुब्बारायुडुमहोदयेन च शोधप्रविधि-पाण्डुलिपिविज्ञानकार्यशालायाः महत्त्वं प्रतिपादितम्। कार्यक्रमस्य सञ्चालनं आचार्यः शैलकुमारीमिश्रया तथा धन्यवादज्ञापनं च डा. अपराजितामिश्रया कृतम्। अस्मिन्नवसरे प्रयागनगरस्य नैके गण्यमान्याः नागरिकास्तथा मूर्धन्यविद्वांसश्च उपस्थिताः आसन्। पञ्चदशदिनानि यावदेषः परिसरः गुरुकुलवत् सक्रियः आसीत्। अस्याः कार्यशालायाः संयोजकः आसीत् परिसरप्राचार्यः सर्वनारायणझाः तथा च सहसंयोजिका चासीत् संग्रहाध्यक्षा डा. बीना मिश्रा। एषु पञ्चदशदिवसेषु २७ विद्वांसः ४७ व्याख्यानानि प्रस्तुतवन्तः। ०१.१२.२०१२ दिनाङ्के परिसरे जयपुरस्थ-जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतेः आचार्य-रामानुजदेवनाथस्य आध्यक्ष्ये अस्याः कार्यशालायाः उद्यापनसमारोहः समायोजितः। अस्मिन् कार्यक्रमे माधवमठस्य श्री १००८ श्रीविद्यात्मतीर्थस्वामी मुख्यातिथिरूपेण तथा च न्यायमूर्तिः गिरिधरमालवीयः विशिष्टातिथिरूपेण सभामुद्बोधितवन्तौ। एतदवसरे अतिथिभिः प्रतिभागिभ्यः प्रमाणपत्राणि प्रदत्तानि। एतानि प्रमाणपत्राणि तेभ्यः वाक्परीक्षाधारेण प्रदत्तानि।

## व्याकरणशास्त्रीयराष्ट्रियसङ्गोष्ठी सम्पन्ना



सङ्गोष्ठ्याः किञ्चन दृश्यम्

ऐदम्प्राथम्येन मुम्बईपरिसरे 'व्याकरणशास्त्रे नूतनाः प्रवृत्तयः सम्भावनाश्च' इत्यमुं विषयमुररीकृत्य दिवसत्रयव्यापिनी व्याकरणशास्त्रीयराष्ट्रियसङ्गोष्ठी २०.१२.२०१२तः २२.१२. २०१२ पर्यन्तं परिसरप्राचार्यस्य प्रकाशचन्द्रस्य आध्यक्ष्ये व्याकरणविभागाध्यक्षस्य डा. झाबोधकुमारस्य च संयोजने समबोभूवीत्। गोष्ठ्यामस्यां नवसत्रेषु भारतस्य विभिन्नेभ्यः कोणेभ्यः ३६ विद्वांसः समागत्य स्वीयान् विचारान् प्राकटयन्।

गोष्ठ्याम् इमे विशिष्टातिथयः सम्मिलिताः आसन् – आचार्यायाः सरोजाभाटेमहाभागायाः आध्यक्ष्ये सम्भूते द्वितीयसत्रे लखनऊपरिसरप्राचार्यः आचार्यः सुरेन्द्रझाः, भोपालपरिसरप्राचार्यः आजादमिश्रः, जयपुरपरिसरव्याकरणविभागाध्यक्ष्यः आचार्यः अर्कनाथचौधरी, मुम्बईपरिसरप्राचार्यः प्रकाशचन्द्रः, पुरीतः आचार्यः वी.के. शैलजा च स्वशोधपत्राणि प्रास्तुवन्। आचार्यस्य सुरेन्द्रझामहोदयस्य आध्यक्ष्ये घटिते तृतीयसत्रो दरभङ्गातः आचार्यः शशिनाथझा, मुम्बईतः डा. मदनमोहनझाः च शोधपत्रवाचनमकुरुताम्। चतुर्थसत्रे आचार्यस्य आजादमिश्रस्य सत्राध्यक्षे दरभङ्गातः आचार्यः सुरेश्वरझाः, मुक्तस्वाध्यायपीठनिदेशकः डा.रमाकान्तपाण्डेयमहोदयश्च स्वीयशोधविचारान् स्पष्टीकृतवन्तौ। पञ्चमे सत्रे आचार्यस्य रामरूपमिश्रस्य सत्राध्यक्षे आचार्यः कलाचार्यः, डा. त्रिलोचनझाः, डा. रमेशझाः प्रभृतयः व्याकरणे नव्यप्रवृत्तीः प्राकटयन्। षष्ठे सत्रे आचार्यः कलाचार्यः सत्राध्यक्षः आसीत्। तदा डा. उमाकान्तचतुर्वेदी, डा. लक्ष्मीधारपण्डा, डा. अशोकचन्द्रगौडशास्त्री च स्वीयान् विचारान् प्रास्तुवन्। तृतीयदिने सप्तमसत्रे मुम्बईजयपुरयोः प्राचार्यचरस्य आचार्यस्य अर्कनाथचौधारिमहोदयस्य आध्यक्ष्ये जयपुरपरिसरव्याकरणाचार्यः शिवकान्तझाः, गङ्गानाथझापरिसरतः डा. वनमालीविश्वालः, आई.आई.टि., पवई तः आचार्यः मल्हारकुलकर्णी. मुम्बईपरिसरतः डा. गायत्रीमुरलीकृष्णश्च स्वकीयान् शोधविचारान् समचार्चयन्त। अष्टमसत्रे आचार्यस्य वी.के. शैलजामहाभागस्य आध्यक्ष्ये डा. बोधकुमारझाः, डा.मन्थाश्रीनिवासुः, डा. प्रियव्रतमिश्रश्च व्याकरणे आधुनिकतां वैज्ञानिकतां च प्रत्यपादयन्। इत्थं व्याकरणसङ्गोष्ठी विभिन्नैः पदशास्त्रप्रमाणपटुभिः राराज्यमाना समापनसत्रपर्यन्तं समागता।

२२.१२.२०१२ दिनाङ्के गोष्ठ्याः समापनं संस्थानकुलसचिवस्य आचार्यस्य के.बी. सुब्बरायुडुमहोदयस्य आध्यक्ष्ये, अन्ताराष्ट्रियसंस्कृताध्ययनपरिषदः अध्यक्षचरस्य आचार्यरामकरणशर्ममहोदयस्य मुख्यातिथ्ये, काशीहिन्दूविश्वविद्यालयतः समागतस्य आचार्यरमेशचन्द्रपण्डामहोदयस्य सारस्वतातिथ्ये, आचार्यपुष्पादीक्षितमहाभागायाः विशिष्टातिथ्ये च समभूत्। गोष्ठ्याम् आचार्यरामकरणशर्मा व्याकरणस्य प्राशस्त्यं प्रतिपादयन् आधुनिककाले व्याकरणशोधसम्भावनाः प्रत्यपादयत्। आचार्यपुष्पादीक्षित व्याकरणावगमनं सर्वजनसुलभसाध्यं कारयितुं कतिपयान् विधीन् समुपस्थापितवती। कुलसचिवः सुब्बरायुडुमहोदयः शब्दब्रह्म-परब्रह्मयोरैक्यं विमृशन्तः शब्दतत्वमाविष्कृतवान्। सभासञ्चालनं डा.गायत्रीमुरलीकृष्णेन कृतम्।

## मानवप्रकृत्योः वैदिकचिन्तनविषये सङ्गोष्ठी आयोजिता



ग्रन्थलोकार्पणस्य दृश्यमेकम्

'मानवप्रकृत्योः वैदिकचिन्तनम्–आधुनिकसन्दर्भे' इति विषयमधिकृत्य वेव्ससंस्थायाः त्रिदिवसीयं षोडशं राष्ट्रियसम्मेलनं दिसम्बरमासे २४–२६ दिनाङ्केषु दिल्लीविश्वविद्यालयीय-दक्षिणपरिसरस्य संस्कृतविभागस्य संयुक्ततत्त्वावधाने सम्पन्नम्। सम्मेलनेऽस्मिन् विविधप्रदेशेभ्यः समागताः शताधिकाः प्रतिभागिन उपस्थिता आसन्, यैः वैदिकविचाराणां वर्तमानसमये उपयोगितायाः चर्चा विस्तरेण कृता।

माननीयन्यायमूर्तिना डा. मुकुन्दकामशर्मणा कार्यक्रमस्य उद्घाटनभाषणमकारि। तेन प्रतिपादितं यत् वेदाः समग्रज्ञानस्य निधिरूपाः सन्ति येषु खलु वर्तमानसमस्यानां समाधानानि प्राप्तव्यानि। कार्यक्रमस्यास्य मुख्यातिथिना राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना आचार्येण राधावल्लभत्रिपाठिना वैदिकचिन्तनस्य समग्रतायाः प्रशंसा कृता। तेन प्रोक्तं यत् वयं प्रकृतेरविभिन्नाः स्मः, सर्वत्र वेदमन्त्रेषु इयमेव प्रतीतिर्भवति। अद्य मानवस्य प्रकृत्या सह साक्षात् सम्बन्धस्याभाव एवानेकेषामापदां कारणमस्ति येन मानवजीवने पर्यावरणे च हानिकारकाः विकाराः समुपजायन्ते। वेव्स-अध्यक्षवर्येण आचार्येण रामकरणशर्मणा सत्रस्याध्यक्षपदमलङ्कृतम्। अवसरेऽस्मिन् डा. अपर्णाधीरस्य यजुर्वेदाध्ययनपरः ग्रन्थोऽपि लोकार्पितः। वेव्ससंस्थायाः महासचिवया डा. शशितिवारीमहोदयया सत्रस्यास्य सञ्चालनं कृतम्। आमन्त्रितवक्तृषु राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः के.बी. सुब्बरायुडुः, दिल्लीविश्वविद्यालयस्य कलासङ्कायप्रमुखः आचार्यः एच. एस. प्रसादः, अमेरिकादेशात् समागता श्रीमती महालक्ष्मीः, संस्कृतविभागस्याध्यक्षः आचार्यः मिथिलेशचतुर्वेदी, दक्षिणपरिसरस्थसंस्कृत-विभागस्याध्यक्षा डा. मीराद्विवेदी चोल्लेखनीयाः सन्ति।

## कुलपतेः दैनन्दिनी

०२.०७.१२ अंशकालिकस्य साहित्यव्याख्यातृपदस्य नियोजनार्थं समायोजिते साक्षात्कारे आध्यक्ष्यम्।

०३.०७.१२ अंशकालिकस्य व्याख्यातृपदस्य नियोजनार्थं समायोजिते साक्षात्कारे आध्यक्षम्।
इन्दिरागान्धीराष्ट्रीयकलाकेन्द्रे आयोजिते वार्षिकप्रतिष्ठादिवसकार्यक्रमावसरे विशिष्टातिथित्वेन उपस्थितिः।

०४.०७.१२ अंशकालिकस्य व्याख्यातृपदस्य नियोजनार्थं समायोजिते साक्षात्कारे आध्यक्ष्यम्।

०६.०७.१२ ज्योतिष-धर्मशास्त्र-सर्वदर्शनविषयाणाम् अंशकालिकव्याख्यातृपदानां नियोजनार्थं समायोजिते साक्षात्कारे आध्यक्ष्यम्।

०७-०९.०७.१२ तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिं प्रति संस्थापितानाम् अभियोगानां कृते अनुसन्धानं कारितम्।
भारतीयविश्वविद्यालयसंघेन तिरुपतिस्थ-वैदिकविश्वविद्यालयाय प्रदातव्यवित्तीयसदस्यसहायतार्थं गठितनिरीक्षणसमितेः आध्यक्ष्यम्।

११.०७.१२ नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतित्वेन अतिरिक्तप्रभारग्रहणम्।
आचार्यवाचस्पत्युपाध्यायव्याख्यानमालायाः आध्यक्ष्यम्।

१२.०७.१२ प्रकाशनसमितेः उपवेशने आध्यक्ष्यम्।

१३.०७.१२ दूरदर्शने साक्षात्कारः प्रदत्तः।

१९.०७.१२ हिन्दीराजनीतिशास्त्रविषययोः व्याख्यातृपदस्य साक्षात्कारे आध्यक्ष्यम्।

२०.०७.१२ आंग्ल-इतिहासविषययोः व्याख्यातृपदस्य साक्षात्कारे आध्यक्ष्यम्।

२२-२४.०७.१२ गुजरातप्रान्तस्य महुवास्थ-कलशगुरुकुले रामायणमुद्दिश्य आयोजिते राष्ट्रियसम्मेलने उपस्थितिः शोधपत्रप्रस्तुतिश्च।

२५.०७.१२ संस्कृत-पालि/प्राकृत-अरबी-फारसीभाषाविदुषां कृते प्रदीयमानस्य राष्ट्रपतिसम्मानपत्रस्य अपि च युवविदुषां कृते प्रदीयमानस्य महर्षिबादरायणव्याससम्मानस्य प्रास्ताविकचयनसमितेः उपवेशने उपस्थितिः।

२७.०७.१२ उज्जयिनीस्थ-महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य सामान्यसभायाः उपवेशने समुपस्थितिः।

२८.०७.१२ नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वित्तसमितेः प्रबन्धसमितेश्च उपवेशने आध्यक्ष्यम्।
संस्कृतविमर्श-सम्पादकमण्डलस्य उपवेशने आध्यक्ष्यम्। संस्कृतसप्ताहस्योद्घाटनकार्यक्रमे आध्यक्ष्यम्। कविसपर्यायाः आध्यक्ष्यम्।

३०.०७.१२ मुक्तस्वाध्यायपीठस्य सहायकाचार्यपदस्य चयनसमितेः आध्यक्ष्यम्।

३१.०७.१२ मानवसंसाधनविकासमन्त्रिणः आध्यक्ष्ये समायोजिते यूनेस्को (संयुक्तराष्ट्र-शैक्षिक-वैज्ञानिक-सांस्कृतिकसंगठनम्) इत्यनेन सहयोगाय भारतीयराष्ट्रियायोगस्य उपवेशने समुपस्थितिः।

०२.०८.१२ नवदेहलीस्थ-जवाहरलालनेहरुविश्वविद्यालयेन समायोजिते कार्यक्रमे संस्कृतभाषाविज्ञाने व्याख्यानम्।
जवाहरलालनेहरुविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रेण आयोजितस्य संस्कृतसप्ताहोत्सवस्य उद्घाटनम्।

०३.०८.१२ नवदेहलीस्थ-टैगोरगार्डन इत्यत्र स्थितस्य केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धसमितेः उपवेशने आध्यक्ष्यम्।

०५.०८.१२ जयपुरस्थ-जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये शोधकार्यशालायाः सम्पूर्तिसत्रे व्याख्यानम्।

०६.०८.१२ संस्कृतसप्ताहोत्सवस्य सम्पूर्तिकार्यक्रमे आध्यक्ष्यम्।

०९.०८.१२ श्रीमल्लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य भवननिर्माणसमितेः उपवेशने अध्यक्षता।
तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य विषये संस्थापितानामभियोगानां तथ्यान्वेषिसमितेः उपवेशने आध्यक्ष्यम्।

१३.०८.१२ श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वित्तसमितेः उपवेशने अध्यक्षता।

१४.०८.१२ दिल्लीसंस्कृताकादम्या समायोजिते संस्कृतकविसम्मेलने मुख्यातिथित्वेन उपस्थितिः।
मानवसंसाधनविकासमन्त्रालये संस्थानसम्बद्धानि मुख्यानि अपूर्णानि प्रकरणानि सम्पादयितुं संस्थानधिकारिभिः सह उपवेशनं प्रबोधनञ्च।

१७.०८.१२ आदर्शसंस्कृतमहाविद्यालयानाम् आदर्शसंस्कृतशोधसंस्थानां च प्राचार्यैः सह सञ्जातस्य उपवेशनस्य आध्यक्ष्यम्।

१८.०८.१२ हैदराबादे साहित्य-अकादम्याः संस्कृतपरामर्शमण्डलस्य उपवेशने समुपस्थितिः।

२०.०८.१२ नवदेहल्यां संस्कृतसंवर्धनप्रतिष्ठानेन समायोजिते सम्मेलने उपस्थितिः।

२१.०८.१२ संस्कृत-हिन्दी-भाषानुवादकार्यशालायाम् आध्यक्ष्यम्।
देववाणीपरिषदा आयोजिते सङ्कल्पदिवससमारोहे आध्यक्ष्यम्।

२७.०८.१२ मुक्तस्वाध्यायपीठे सहायकाचार्यपदस्य चयनसमितेः उपवेशने आध्यक्ष्यम्।

२८.०८.१२ योजनानुभागस्य मूल्याङ्कनसमितेः उपवेशने आध्यक्ष्यम्। संस्थानस्य भवनसमितेः उपवेशने आध्यक्ष्यम्।

२९.०८.१२ माध्यमिकविद्यालयशिक्षायाः राष्ट्रियसंस्कृतशिक्षामण्डलस्य संस्थापनार्थाय योजना-आयोगस्य सदस्यैः सह उपवेशनम्।

०६.०९.१२ नवदेहलीस्थ-जवाहरलालनेहरुविश्वविद्यालयेन समायोजिते निखिलसंस्कृतछात्रसम्मेलने आध्यक्ष्यम्।

०९.०९.१२ इलाहाबादपरिसरे पं. मण्डनमिश्रव्याख्यानस्याध्यक्ष्यम्, मीरासम्मानप्राप्तिश्च।

१०.०९.१२ मुक्तस्वाध्यायपीठस्य प्रवेशोत्सवे ग्रन्थलोकार्पणकार्यक्रमे च आध्यक्ष्यं।

१३.०९.१२ नवदेहलीस्थ आई.आई.सी. इत्यत्र डॉ. इन्द्रनाथचौधरीप्रणीतस्य ग्रन्थस्य लोकार्पणकार्यक्रमे समुपस्थितिः।

| | |
|---|---|
| १४.०९.१२ | हिन्दीदिवसोत्सवे काव्यपाठकार्यक्रमे समुपस्थितिः। |
| १५.०९.१२ | नवदेहलीस्थ टैगोरगार्डन इत्यत्र केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धनसमितेः उपवेशने आध्यक्ष्यम्। |
| १६.०९.१२ | राष्ट्रियमूल्याङ्कन एवं प्रत्यायनपरिषदः प्रमाणपत्रप्रदानमहोत्सव उपस्थितिः। |
| १७.०९.१२ | नवदेहलीस्थ-शास्त्रिभवने भाषिकसंयुक्तसचिवेन सह अन्ताराष्ट्रियसंस्कृताध्ययन समवायस्य सामान्यसमित्या प्रस्तुतानां प्रस्तावानां विवरणविषये उपवेशने समुपस्थितिः। |
| १८.०९.१२ | जी.आई.ए.सी. उपवेशने समुपस्थितिः। |
| १९.०९.१२ | नवदेहलीस्थ-आई.आई.सी. इत्यत्र समूहचर्चायां समुपस्थितिः। |
| २०.०९.१२ | लखनऊपरिसरे पं.पं. गोपीनाथ कविराजस्मृति व्याख्यानमालाया आध्यक्ष्यम्। |
| २२.०९.१२ | गरलीपरिसरस्य स्थापनादिवसोत्सवे अध्यक्षता। |
| २४.०९.१२ | नवदेहलीस्थ-जवाहरलालनेहरुविश्वविद्यालये विशिष्टसंस्कृताध्ययनकेन्द्रे सहायकाचार्याणां सहाचार्यत्वेन प्रोन्नतये समाहूते चयनसमिति-उपवेशने समुपस्थितिः। |
| २६.०९.१२ | लाइप्ज़िगनगरे 'संस्कृतिषु शास्त्रप्रस्थानेषु च पञ्चतन्त्रम्' इति विषयमधिकृत्य समायोजिते अन्ताराष्ट्रियसम्मेलने शैक्षणिकसंयासेजकत्वेन उपस्थानाय प्रस्थानम्। |
| २७.०९.१२ | उपरिसूचित सम्मेलने उद्घाटनसत्रे प्रवर्तकभाषमाणम्, शोधपत्रप्रस्तुतिश्च) |
| ३०.०९.१२ | वाइमारनगरे गोथेसङ्ग्रहालयावलोकनम्। |
| ०३.१०.१२ | नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे सहायकपुस्तकाध्यक्ष-पदस्य साक्षात्कारे आध्यक्ष्यम्। |
| ०४.१०.१२ | नवदेहलीस्थ-शास्त्रिभवने केन्द्रीयशास्त्रीय-तमिल-संस्थानस्य शासीमण्डलस्य उपवेशने उपस्थितिः। |
| ०५.१०.१२ | आदर्शसंस्कृतमहाविद्यालय/शोधसंस्था-परियोजनायाः आयोजनसमितेः उपवेशने उपस्थितिः। |
| | राष्ट्रियसंस्कृतसंस्थाने सहायकनिदेशक/उपनिदेशकपदस्य सहायककुलसचिव/ उपकुलसचिवपदत्वेन परिवर्तनं विधातुं नूतननियमानां रचयित्र्याः अनुवीक्षणसमितेः आध्यक्ष्यम्। मानवसंसाधनविकासमन्त्रिभिस्सह तेषाम् आवासे उपवेशनम् |
| ०६.१०.१२ | संस्कृतानुवादकार्यशालायाः आध्यक्ष्यम्। |
| ०९.१०.१२ | श्रीयोगानन्दशास्त्रिभिः सह मेलनम्। |
| ११.१०.१२ | नवदेहलीस्थ-भारतीमहाविद्यालये समायोजिते सम्मेलने बीजभाषणम्। |
| १५.१०.१२ | राष्ट्रियसंस्कृतसंस्थानस्य स्थापनादिवसकार्यक्रमे अध्यक्षता। |
| २३.१०.१२ | 'इण्डिया-इण्टरनेशनल-फाउण्डेशन' इत्यत्र ग्रन्थलोकार्पणकार्यक्रमे आध्यक्ष्यम्। |
| २४.१०.१२ | नवदेहलीस्थ-श्रीमल्लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे आयोजिते कार्यक्रमे उद्घाटनसत्रे समुपस्थितिः। |
| ३०-३१.१०.१२ | भोपालपरिसरे समायोजिते पञ्चमे अन्तःपरिसरीय-युवमहोत्सवे समुपस्थितिः। |
| ३१.१०.१२ | भोपाले देववाणीपरिषदा समायोजिते पण्डितराजमहोत्सवस्य स्वर्णजयन्तीमहोत्सवे उद्घाटनसत्रे आध्यक्ष्यम्। |
| ०१.११.१२ | भोपालपरिसरे युवमहोत्सवस्य सम्पूर्तिकार्यक्रमे अध्यक्षता। |
| ०४.११.१२ | उज्जैने महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य स्वर्णजयन्त्युत्सवावसरे आयोजिते उद्घाटनावसरे विशिष्टाभिनन्दनसत्रे उपस्थितिः। |
| ०६.११.१२ | संस्थाने डीटीएच-केन्द्रसंयोजकैः सह उपवेशने आध्यक्ष्यम्। |
| १४.११.१२ | साहित्याकादम्यां ग्रन्थलोकार्पणोत्सवे विशिष्टातिथित्वेन समुपस्थितिः। |
| १९.११.१२ | राष्ट्रपतिभवने इन्दिरागान्धीराष्ट्रियकलाकेन्द्रेण आयोजिते रजतजयन्त्युत्सवे उपस्थितिः। |
| | एन.ए.एन.टी.एस., फ्रांस द्वारा इण्डिया इण्टरनेशलन सेन्टर इत्यत्र समायोजिते सम्मेलने शोधपत्रवाचनम्। |
| २८.११.१२ | उज्जयिनीस्थ-कालिदाससंस्कृताकादम्या आयोजितायां कालिदासव्याख्यानशृङ्खलायां द्वितीये सत्रे आध्यक्ष्यम्। |
| २९.११.१२ | संस्थाने वित्तसमितेः प्रबन्धमण्डलस्य च उपवेशने आध्यक्ष्यम्। |
| ०१.१२.१२ | श्रीसदाशिवपरिसरे 'आधुनिकसंस्कृतसाहित्ये उत्कलीयविदुषां अवदानम्' इति विषयमाधृत्य आयोजितसम्मेलनस्य उद्घाटनसत्रे आध्यक्ष्यम्। |
| ०५.१२.१२ | नवदेहलीस्थ-टैगोरगार्डनस्थितस्य केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धसमितेः उपवेशने आध्यक्ष्यम्। |
| ०९.१२.१२ | चिन्मयमिशनस्य सांस्कृतिककार्यक्रमे मुख्यातिथ्यम्। |
| १२.१२.१२ | राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषदः परामर्शमण्डलस्य उपवेशने उपस्थितिः। |
| १८.१२.१२ | दिल्लीकैण्टक्षेत्रे समायोजिते टैगोरगार्डन केन्द्रीयविद्यालयस्य वार्षिकोत्सवे आध्यक्ष्यम्। |
| १९.१२.१२ | मुम्बईविश्वविद्यालयस्य संस्कृतविभागस्य टैगोर-चेयर-आफ-काम्परेटिव लिटरेचर इत्यनेन 'तुलनात्मककाव्यशास्त्रमाधृत्य आयोजिते सम्मेलने बीजभाषणम्। |
| २०.१२.१२ | मुम्बईपरिसरे आयोजिते व्याकरणसम्मेलनस्य उद्घाटनकार्यक्रमे आध्यक्ष्यम्। |
| २१.१२.१२ | नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य शैक्षणिक-समितेः उपवेशने आध्यक्ष्यम्। |
| २४.१२.१२ | वेब्स-संस्थया आयोजिते षोडशे-भारतीयसम्मेलनस्य उद्घाटनसत्रे बीजभाषणम्। |
| २६.१२.१२ | तिरुपतौ साहित्याकादमी-तिरुपतिराष्ट्रियसंस्कृतविद्यापीठयोः संयुक्तरूपेण समायोजितराष्ट्रियसम्मेलनस्य उद्घाटनसत्रे बीजभाषणम्। |
| ३१.१२.१२ | राष्ट्रियसंस्कृतसंस्थानस्य व्यापकविकासपरियोजनायाः प्रारूपनिर्माणसमितेः उपवेशने आध्यक्ष्यम्। |

## संस्थानविदुषां क्रियाकलापाः/उपलब्धयः

**आचार्यः सुरेन्द्रपाठकः** – लखनऊपरिसरे व्याकरणविभागाध्यक्षोऽयं व्यासपूर्णिमापर्वणि हरिद्वारे ऋषिसंस्कृतमहाविद्यालये सभाध्यक्षेण ऋषिबालकृष्णमहाराजेन महामण्डलेश्वराणां सन्निधौ एकादशसहस्ररूप्यकैः ऊर्णवस्त्रनारिकेलफलादिभिः विशिष्टं सम्माननमवाप्नोत्।

**आचार्यः विजयकुमारजैनः** – लखनऊपरिसरे बौद्धदर्शनविभागाध्यक्षोऽयं लखनऊनगरे २१.०७.२०१२ दिनाङ्के डा. ज्योतिप्रसादजैनशताब्दीसमारोहे शोधपत्रवाचनमकरोत्। ०४.०९.२०१२ दिनाङ्के नवदेहल्यां समायोजितायां राष्ट्रियसङ्गोष्ठ्यां 'भारतीय योग परम्परा एवं ज्ञानार्जन' इत्येतत् शोधपत्रं प्रास्तौत्।

**डा. पि. इन्दिरा** – गुरुवायूरपरिसरे साहित्यविभागे सहाचार्या कालटिस्थे श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालये २२.०८.२०१२ तमे दिनाङ्के 'संस्कृतं भारतस्य नवीनोद्भवश्च' इति विषये आयोजितायां राष्ट्रियसङ्गोष्ठ्यां राजा राममोहनरायः – भारतीयपुनरुद्भवस्य प्रतिनिधिः इति शीर्षकाङ्कितम् पत्रम् अपठत्।

**डा. मदनमोहनपाठकः** – लखनऊपरिसरे ज्योतिषविभागाध्यक्षोऽयं ०२.०७.२०१२ तः ११.०७.२०१२ पर्यन्तं इलाहाबादजनपदे गङ्गानाथझापरिसरे मुक्तस्वाध्यायपीठेन आयोजितायां दूरस्थशिक्षापाठलेखनकार्यशालायां भागं गृहीत्वा ज्योतिषशास्त्रस्य पाठानां लेखनं सम्पादनञ्च व्यदधात्।

**डा. धनीन्द्रझाः** – लखनऊपरिसरे व्याकरणविभागे अध्यापकोऽयं ०३.९.२०१२ तः ०९.०९.२०१२ पर्यन्तं मुक्तस्वाध्यायपीठस्य दूरस्थशिक्षाकार्यशालां चतुर्णां ग्रन्थानां पुनरीक्षकरूपेण भागमगृह्णात्। ३१.०८.२०१२ दिनाङ्के फैजाबादजनपदे राममनोहरलोहिया-अवधविश्वविद्यालये शोधोपाधेः वाक्परीक्षक- विशेषज्ञरूपेण समुपस्थितः।

**डा. बनमाली बिश्वालः** – इलाहाबादस्थ-गङ्गानाथझापरिसरे सहाचार्योऽयं १५.०९.२०१२ तमे च दिनाङ्के सच्चा-अध्यात्मप्राच्यविद्याशोध-प्रशिक्षणसंस्थानस्य उद्घाटनसमारोहे विशिष्टवक्तृरूपेण व्याख्यानं प्रस्तुतवान्।

**डा. जयप्रकाशनारायणः** – संस्थानमुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं २५-२६ जुलाई, २०१२ दिनाङ्कयोः दिल्लीस्थ-राज्यशैक्षिकप्रशिक्षण-.अनुसन्धानपरिषदा आयोजितद्विदिवसीये १२ स्नातकोत्तरशिक्षकप्रशिक्षणसम्मेलने 'शिक्षणप्रविधिः प्रवर्धनं च' इत्यस्मिन् विषये व्याख्यानमकरोत्।

**डा. श्यामदेवमिश्र-डा. अमितकुमारशुक्ल-डा. कुलदीपशर्माणः** – लखनऊपरिसरे इमे अध्यापकाः जुलाईमासे जयपुरपरिसरे मुक्तस्वाध्यायपीठेन आयोजितायां दूरस्थशिक्षापाठलेखनकार्यशालायां भागं गृहीत्वा स्व-स्वशास्त्रे पाठलेखनं कृतवन्तः।

**श्री उपेन्द्रभार्गवः** – मुम्बईपरिसरे ज्योतिषविभागीयः सहायकाचार्यः – ५-१२-१२ तः १६-१२-१२ दिन(कपर्यन्तं संस्थानस्य मुक्तस्वाध्यायपीठेन भोपालपरिसरे समायोजितायां पाठलेखनकार्यशालायां भागमवहत्।

**डा. गायत्रीमुरलीकृष्णः** – मुम्बई-परिसरे शिक्षाशास्त्रविभागे सहायकाचार्योऽयं जुलैमासस्य प्रथमदिनाङ्कपर्यन्तं अहमदाबादनगरे विद्यमाने दर्शनंसंस्कृतमहाविद्यालये राष्ट्रियसंस्कृतसंस्थानेनायोजिते अनौपचारिकशिक्षक- प्रशिक्षणकार्यक्रमे प्रशिक्षकत्वेन भागं ग्रहितवान्। २२.११.१२तः १९.१२.१२ पर्यन्तं चण्डीगढस्थे पंजाबविश्वविद्यालये पुनर्नवीकरणपाठ्यचर्यायां (Orientation course) भागमवहत्।

**डा. राकेशकुमारजैनः** – मुम्बई-परिसरे साहित्यविभागे सहायकाचार्योऽयं (अनु.) ०५ तः ०७ अक्टूबर, २०१२ पर्यन्तं जयपुरान्तर्गते पद्मपुरानगरे आचार्यसमन्तभद्रकन्यामहाविद्यालयपक्षतः समायोजितायाम् अखिलभारतीयविद्वत्संगोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डा. मन्था श्रीनिवासु** – मुम्बईपरिसरे शिक्षाशास्त्राविभागीयः सहायकाचार्योऽयं १०.११.१२तः २०.११.१२ पर्यन्तं संस्थानमुख्यालये नवदेहल्यामायोजितायाम् अनुवादलेखनकार्यशालायां भागमवहत्।

**डा. चन्द्रशेखरभट्टः** – श्रीदक्षिणाम्नायशृङ्गेरीशारादापीठाधीश्वराणां जगद्गुरुणां श्रीश्रीभारतीतीर्थमहास्वामिनां दिव्यसन्निधौ अस्मिन् वर्षे चेन्नैनगरे प्रवर्तितमहागणपतिवाक्यार्थविद्वत्सभायाम् (१९-९-२०१२ तः १-१०-२०१२) शृङ्गेरीपरिसरस्य व्याकरणप्राध्यापकः अयं व्याकरणशास्त्रे सर्वस्य द्वे इति सूत्रविषये वाक्यार्थं विधाय जगद्गुरुश्रीचरणानामनुग्रहपात्रतां प्राप्य स्वर्णाङ्गुलीयकेन सभाजितः।

**डा. सुब्राय वि. भट्टः** – शृङ्गेरीपरिसरस्य अध्यापकोऽयं यडतोरे योगानन्देश्वरमठे १८.७.१२ तः २२.७.१२ पर्यन्तं समायोजितायां वेदान्तगोष्ठ्यां भागमग्रहीत्। चेन्नैनगर्यां दक्षिणाम्नायशृङ्गेरीशारदापीठेन २३.९.१२ तः १.१०.१२ पर्यन्तं समायोजितायां महागणपतिवाक्यार्थविद्वत्सभायां मीमांसाशास्त्रे 'रेवत्यधिकरणम्' इति विषये वाक्यार्थमकार्षीत्।

**डॉ. सि. एस्.एस्. नरसिंहमूर्तिः** – १३.८.१२ दिनाङ्के शृङ्गेरीपरिसरे वाक्यार्थपरिषदः अधिवेशने 'संयोगान्तस्य लोपः' इति विषये वाक्यार्थं प्रास्तौत्। १८.८.१२ दिनाङ्के मैसूरु अवधूतदत्तपीठेन समायोजितायां विद्वत्सभायां वाक्यार्थं व्यधात्।

**डॉ. रामचन्द्रुल बालाजी** – शृङ्गेरीपरिसरस्य अध्यापकोऽयं १८.८.१२ दिनाङ्के मैसूरु-अवधूतदत्तपीठेन समायोजितायां विद्वत्सभायां वाक्यार्थं व्यधात्। २६ एवं २७.९.१२ दिनाङ्कयोर्मध्ये गुन्टूरनागार्जुनविश्वविद्यालये प्रवृत्तायां राष्ट्रियसंगोष्ट्यां भागग्रहणमकरोत्।

**डॉ. चन्द्रशेखरभट्टः** – शृङ्गेरीपरिसरस्य अध्यापकोऽयं १९.९.१२ तः १.१०.१२ पर्यन्तं चेन्नैनगर्यां श्रीदक्षिणाम्नायशृङ्गेरीशारदापीठेनायोजितायां महागणपतिवाक्यार्थविद्वत्सभायां व्याकरणे 'सर्वस्य द्वे' इति सूत्रमाश्रित्य वाक्यार्थं प्रास्तौत्।

**डॉ. राघवेन्द्रभट्टः** – शृङ्गेरीपरिसरस्य अध्यापकोऽयं ११.७.१२ दिनाङ्के उडुपिसंस्कृतमहापाठशालायां राष्ट्रियसङ्गोष्ठ्यां 'वक्रोक्तिप्रस्थानम्' इति विषये व्याख्यानं प्रादात्।

**डॉ. रमाकान्तमिश्रः** – ०५.०९.१२ तः ०७.०९.१२ पर्यन्तं भोपालपरिसरेण समायोजिते अनुसन्धानविषयिण्यां राष्ट्रियसङ्गोष्ठ्यां, राजिनगरे डि.ए. वि. विद्यालयसमूहेन समायोजिते संस्कृतसप्ताहावसरे मुख्यातिथित्वेन, पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानपक्षतः सितम्बरमासे समायोजितायां रसानुभूति- विषयकराजयस्तरीयसङ्गोष्ठ्यां भागमग्रहीत्।

**डॉ. भगवानसामन्तरायः** – सितम्बरमासे संस्थानमुख्यालयेन समायोजितायामद्वैतवेदान्तविषयस्य पाठ्यक्रमनिर्माणकार्यशालायां भागग्रही अभूत्।

**डॉ. श्यामसुन्दरः** – २२.०९.२०१२ तः ०१.१०.२०१२ पर्यन्तं चेन्नै नगरे प्रवृत्तायां महागणपतिवाक्यार्थसभायां भागमवहत्।

**आचार्यः आजादमिश्रः** – दिसम्बरमासे संस्थानस्य लखनऊपरिसरे त्रिदिवसीयराष्ट्रियज्योतिषशोधसंगोष्ठ्यां भोपालपरिसरप्राचार्येणानेन विशिष्टं व्याख्यानं कृतम्। २१.१२.२०१२ दिनाङ्कात् संस्थानस्य मुम्बईपरिसरे समायोजितायां त्र्याह्निकराष्ट्रियव्याकरणसङ्गोष्ठ्यां विशिष्टेनव्याख्यानेन सह शोधसत्रस्य आध्यक्ष्यं समाचरितम्।

**डॉ. भारतभूषणमिश्रः** – भोपालपरिसरस्य ज्योतिषविभागस्य उपाचार्येणानेन दिसम्बरमासे लखनऊपरिसरे आयोजितायां राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रवाचनं विहितम्।

**डॉ. हर्षकुमार के.के.** – भोपालपरिसरीय-शिक्षाशास्त्रविभागस्य सहायकाचार्येणानेन २१.१२.२०१२ दिनाङ्के मुम्बईपरिसरे समायोजितायां त्र्याह्निकराष्ट्रियव्याकरणसङ्गोष्ठ्यां भागः गृहीतः।

**डॉ. दातारामपाठकः** – भोपालपरिसरस्य शिक्षाशास्त्रविभागस्य अध्यापकेनानेन नवम्बरमासे लखनऊपरिसरे समायोजिते अन्तार्राष्ट्रियशिक्षा-सम्मेलने अपि च उत्तरप्रदेशे बिजनौरे समायोजितायाम् अन्तार्राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रवाचनं कृतम्।

**डॉ. रमाकान्तपाण्डेयः**– मुक्तस्वाध्यायपीठनिदेशकोऽयं २१.१२.२०१२ दिनाङ्कात् मुम्बईपरिसरे समायोजितायां त्र्याह्निकराष्ट्रियव्याकरणसङ्गोष्ठ्यां भागं गृहीतवान्। दिसम्बरमासे लखनऊपरिसरे आयोजितायां राष्ट्रियशोधसङ्गोष्ठ्यां भागमग्रहीत्। श्रीनगरे ०१-०३.१०.२०१२ पर्यन्तम् अखिलभारतीयप्राच्यविद्यासम्मेलनाङ्गतया समायोजितायां पण्डितपरिषदि भागं गृहीतवान्। २७. ११.२०१२ तमे दिनाङ्के गङ्गानाथझापरिसरे समायोजितायां कार्यशालायां व्याख्यानं प्रादात्।

**डॉ. त.महेन्द्रः**– संस्थानमुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं ११-१४.१०.२०१२ दिनाङ्कं यावत् जलन्धरे प्रवृत्ते तृतीये भारतीयविज्ञानसम्मेलने संस्थानस्य प्रातिनिध्यमकरोत्। संस्थानमुख्यालये ६-१५.१०.२०१२ दिनाङ्कं यावत् समायोजितायां संस्कृतानुवादलेखनकार्यशालायां भागमवहत्। नवदेहलीस्थ देववाणी-परिषदा समायोजितायां पण्डितराजजगन्नाथविषयक-राष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डॉ. प्रफुल्लगडपालः**– संस्थानमुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं संस्थानमुख्यालये ६-१५.१०.२०१२ दिनाङ्कं यावत् समायोजितायां संस्कृतानुवादलेखनकार्यशालायां भागमवहत्। नवदेहलीस्थ देववाणी-परिषदा समायोजितायां पण्डितराजजगन्नाथविषयक-राष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डॉ. अजयकुमारमिश्रः**– संस्थानमुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं ४-७.११.२०१२ दिनाङ्केषु उज्जयिन्यां सम्पन्ने द्वितीयविश्ववेदसम्मेलने शोधपत्रवाचनेन साकमेकस्य सत्रस्याध्यक्षमपि कृतम्। नवदेहलीस्थ देववाणी-परिषदा समायोजितायां पण्डितराजजगन्नाथविषयक-राष्ट्रियशोधसंगोष्ठ्यां शोधपत्रं प्रास्तौत्। पुरीस्थश्रीसदाशिवपरिसरे १-३.१२.२०१२ दिनाङ्केषु समायोजितायां राष्ट्रियसङ्गोष्ठ्यां शोधपत्रवाचनमकरोत्।

**कू.वेङ्कटेशमूर्तिः**– संस्थानमुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं ११-१४.१०.२०१२ दिनाङ्कं यावत् जलन्धरे प्रवृत्ते तृतीये भारतीयविज्ञानसम्मेलने संस्थानस्य प्रातिनिध्यमकरोत्। २४-२६.११.२०१२ दिनाङ्केषु वेदव्यासपरिसरे समायोजिते अखिलभारतीयाद्वैतवेदान्तसम्मेलने शोधपत्रं प्रास्तौत्।




कार्यशालायां समवेताः विद्वांसः

## अखिलभारतीयज्योतिष-पाठलेखनकार्यशाला

नवदेहलीस्थेन मुक्तस्वाध्यायपीठेन राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे ५.१२.२०१२तः २५.१२.२०१२ पर्यन्तं एकविंशतिदिनात्मिका अखिलभारतीयज्योतिषपाठ-लेखनकार्यशाला समायोजिता। कार्यशालायां संस्थानस्य प्रत्येकं परिसरात् ज्योतिर्विदः समागत्य शास्त्रि-आचार्यकक्षयोः स्वाध्यायसामग्रीः व्यरचयन्। तेषु आचार्यः वासुदेवशर्मा, डा. भारतभूषणमिश्रः, डा. अशोकथपलियालः, डा. अवधेशश्रोत्रियः, डा. निगमपाण्डेयः, डा. मुरलीकृष्ण टी., डा. ज्योतिप्रसाददाश इत्यादय प्रमुखाः सन्ति। अस्याः कार्यशालायाः संयोजनं डा. श्यामदेवमिश्रः समपादयत्। कार्यशालायाः उद्घाटनं भोपालपरिसरप्राचार्यवर्येण आजादमिश्रेण अकारि। कार्यशालायाः समापनसत्रे भोपालस्य प्रख्यातौ ज्योतिर्विदौ डा. गौरीशङ्करशास्त्री डा. प्रभुदयालुः अग्निहोत्री च मुख्यातिथित्वेन समुपस्थितौ आस्ताम्।

## कलिकातायां संस्कृतदिवससमारोहः

०८.०८.२०१२ दिनाङ्के कलिकातामहानगरे नरेन्द्रपुरस्थे रामकृष्णमिशनावासीयमहाविद्यालयपरिसरे शान्तिनिकेतनस्थ-विश्वभारतीविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्यस्य डा. अरुणरञ्जनमिश्रस्य पौरोहित्ये समारोहेण संस्कृतदिवसः पालितः अभवत्। सभायाः मुख्यातिथिः डा. अयनभट्टाचार्यः स्वकीयभाषणे उक्तवान् यत् 'पूर्वं मूर्खैः एव संस्कृतं मृतभाषा कथ्यते स्म, आधुनिकयुगे जनाः तु संस्कृतं प्रति बद्धादराः सन्ति।' कार्यक्रमस्य सारस्वतातिथिः श्रीराकेशदाशः अवदत् यत् 'आई.आई.आई.टि. हैदराबादादिसंस्थाभिः संस्कृतस्य तान्त्रिकं रूपमाविष्कृतं वर्तते। कस्यापि भाषाशिक्षणतन्त्रस्य मूलं वयं संस्कृते प्राप्नुमः।' 'संस्कृतस्य विकासेन देशस्य बहुभाषाभाषिणामैक्यं नितरां प्रतिष्ठितम्' इति अवोचत् विशिष्टातिथिः डा.गिरिधारीपण्डा। महाविद्यालयस्य राष्ट्रविज्ञानविभागाध्यक्षः डा.अचिन्त्यचट्टोपाध्यायः वाक्यपुष्पप्रदानेन सभामञ्चे विराजमानेभ्यः अतिथिभ्यः धान्यवादान् ज्ञापितवान्। कार्यक्रमस्य अङ्गतया प्रवृत्तायां संस्कृतभाषणस्पर्धायां सौपर्णरायः प्रथमस्थानं, अनूपकुमारदासः द्वितीयस्थानं, कार्तिकमाटिआ च तृतीयस्थानं प्राप्य अतिथिभ्यः प्रमाणपत्राणि पुरस्कारान् च प्राप्तवन्तः।

## नरेन्द्रपुरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रमुद्घाटितम्

१५.०७.२०१२ दिनाङ्के कलिकातानगरे नरेन्द्रपुरस्थे रामकृष्णमिशनावासीयमहाविद्यालयपरिसरे शान्तिनिकेतनस्थविश्वभारतीविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्यस्य डा.अरुणरञ्जनमिश्रस्य करकमलाभ्याम् अनौपचारिकसंस्कृतशिक्षणकेन्द्रमुद्घाटितम्। मङ्गलदीपप्रज्वालनात् परं संस्कृतविभागाध्यक्षः डा. नारायणदाशः छात्राश्च पुष्पगुच्छप्रदानेन अतिथीनां स्वागतं कृतवन्तः। केन्द्रस्य संयोजकः डा. नारायणदाशः अनौपचारिकसंस्कृतशिक्षणकेन्द्रविषये विस्तरशः आलोचितवान्। कथं देशस्य प्रतिगृहं संस्कृतं प्रापयितुं राष्ट्रियसंस्कृतसंस्थानं बद्धपरिकरमिति व्याख्यातवान् च। सभायाः मुख्यातिथिः डा. अयनभट्टाचार्यः स्वकीयभाषणे संस्कृतस्य गौरवं कीर्तितवन्तः। कार्यक्रमस्य सम्मानितातिथिः श्रीराकेशदाशः अवदन्, भाषाशिक्षणस्य मूलं तन्त्रं वयं संस्कृते प्राप्नुमः। भर्तृहरिप्रभृतयः भाषायाः दार्शनिकस्तरं विशदीकृतवन्तः। देशस्य बहुभाषाभाषिणामैक्यं प्रतिष्ठितम् इति अवोचत् अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य अध्यापकः श्रीसौमित्राधिकारी।

## जम्मूपरिसरवार्ता




संस्कृतसमारोहस्य उद्घाटनसमयस्य दृश्यम्

रिसरेऽस्मिन् ३१.०७.२०१२ तः ०३.०८.२०१२ पर्यन्तं त्रिदिवसीयसंस्कृतसमारोहः आयोजितः। द्रपालसिंहः (डी.आई.जी. जम्मू), मुख्यातिथित्वेन आचार्यः आर.डी.शर्मा (विशेषकार्याधिकारी, ) च समुपस्थितौ आस्ताम्। अवसरेऽस्मिन् परिसरप्राचार्यः किञ्च कार्यक्रमाध्यक्षः आचार्यः एम. यत्।

रिसरे श्लोकपाठ-भाषण-निबन्धलेखन प्रभृतिस्पर्धाः आयोजिताः। ०२.०८.२०१२ दिनाङ्के दिनाङ्के समापनसत्रे परिसरप्राचार्यचरः आचार्यः विश्वमूर्तिशास्त्री अध्यक्षः आचार्या वेदकुमारीघई

– परिसरस्य शिक्षाशास्त्रविभागो ०३.०९.२०१२ तः ११.०९.२०१२ पर्यन्तं प्राथमिकचिकित्साप्रशिक्षणशिविरस्य आयोजनं जातम्। शिबिरेऽस्मिन् डा. किरण मन्हास छात्रान् प्राथमिकचिकित्साविजये विस्तृततया प्रशिक्षणम् अयच्छत्। १८-१९.०९.२०१२ दिनाङ्कयोः डा.कविता निजान छात्रान् प्रशिक्षितवती।

**शिक्षकदिवसः** – ०५.०९.२०१२ दिनाङ्के परिसरे शिक्षकदिवसस्य आयोजनमभवत्। केन्द्रीयविद्यालयसंगठनस्य सहायकायुक्ता श्रीमती उषाशमिन्द-वर्या मुख्यातिथित्वेन उपस्थिता आसीत्। कार्यक्रमसंयोजनं परिसरप्राचार्यः अकरोत्। विद्यार्थिनश्च अवसरेऽस्मिन् स्वीयान् विचारान् प्राकटयन्।

परिसरवार्ताः

परिसरवार्ताः

## लखनऊपरिसरवृत्तान्तम्



संस्कृतदिवससमारोहस्य दृश्यमेकम्

**व्यासमहोत्सवः** – जुलाईमासस्य तृतीये दिनाङ्के संस्थानपरिसरे व्यासमहोत्सवः समाचरितः। अवसरेऽस्मिन् परिसरस्य प्राचार्यः आचार्यः सुरेन्द्रझाः स्वीये अध्यक्षीयभाषणे महर्षिव्यासस्य ऐतिह्यमुक्त्वा विद्वत्सपर्याकार्यक्रमान्तर्गततया वर्षेऽस्मिन् महर्षिबादरायणपुरस्कारेण सभाजितस्य डा.ब्रजभूषण-ओझामहोदयस्य सम्माननमकरोत्। साहित्यविभागाध्यक्षः आचार्यो रामलखनपाण्डेयः व्यासाचार्यपरम्पराविषये स्वकीयं वक्तव्यं प्राददात्। सभायां धन्यवादज्ञापनं डा.धनीन्द्रझाः सञ्चालनञ्च डा.गणेशशङ्करविद्यार्थी अकुरुताम्।

**संस्कृतदिवससमारोहः** – प्रतिवर्षमिव परिसरे महता वैभवेन ऐषमः त्रिदिवसीयः संस्कृतमहोत्सवः अगस्तमासस्य प्रथमदिनाङ्कादारभ्य तृतीयं दिनाङ्कं यावदनुष्ठितः। तत्र प्रथमे दिवसे पूर्वाह्णे स्थानीयविद्यालयीयछात्राणां सस्वरश्लोकपाठः परिसरीयछात्राणाञ्च संस्कृतभाषणम् इति द्वे प्रतियोगिते सञ्जाते। अवसरेऽस्मिन् विजेतारः छात्राः परिसरस्य प्राचार्यैः पुरस्कृताः। प्रतियोगितायाः सञ्चालनं डा.गणेशशङ्करविद्यार्थी व्यदधात्।

अपरस्मिन् दिवसे शास्त्रचर्चा विद्वत्सम्माननस्य प्रक्रमे प्रसिद्धविदुषः लखनऊ-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरस्य आचार्यस्य नवजीवनरस्तोगिमहाशयस्य प्रेरणास्पदं सम्बोधनं सञ्जातम्। अवसरेऽस्मिन् ज्योतिषविभागाध्यक्षेण डा. मदनमोहनपाठकेन सम्पादितायाः 'भास्करोदयः' इत्यस्याः शोधपत्रिकायाः लोकार्पणं जातम्।

ततः महोत्सवस्य सम्पन्नतादिवसे राजस्थानसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः आचार्यः सत्यदेवमिश्रः मुख्यातिथिरूपेण सम्प्राप्तः। तद्दिन एव शिक्षाशास्त्रविभागस्य १९८६ इत्यस्य सत्रस्य अतिथिप्रवक्तृरूपेण परिसरे सेवां प्रदत्तवन्तौ आचार्यौ डा.ललितबिहारीवाजपेयी डा. लक्ष्मणचतुर्वेदी चेत्येतौ परिसरप्राचार्येण सभाजितौ। अस्मिन् दिवसे पुरातनच्छात्राणामपि उपवेशनं सञ्जातम्। कार्यक्रमस्य सञ्चालनं डा. लक्ष्मीनिवासपाण्डेयः अकरोत्।

**म.म.पं.गोपीनाथकविराजव्याख्यानमाला** – २०.०९.२०१२ दिनाङ्के पं.गोपीनाथकविराजव्याख्यानमालायाः चतुर्थं पुष्पं विकासमवाप। अवसरेऽस्मिन् मुख्यवक्तृरूपेण प्रसिद्धतन्त्रशास्त्रवेत्ता ब्रिटिशविद्वान् आचार्यः मार्क डिस्कोव्स्की 'विगतचत्वारिंशद्वर्षेषु प्राचीनशैवागमविषयकम् अन्वेषणम्' इत्यस्मिन् विषये स्वगतं प्रास्तौत्। तेन उक्तं यत् तन्त्रसाधना काचित् आध्यात्मिकक्रिया वर्तते। शैवतन्त्रस्य प्रामाणिकग्रन्थस्य अभिनवगुप्तस्य 'तन्त्रालोकः' इत्यस्य उद्धरणानि उक्त्वा अनेन उक्तं यत् नवाक्षरमन्त्रस्य पारायणेन शैवसम्प्रदायं प्रविविक्षुः स्वतो दीक्षितो जायते। सभायामस्याम् आध्यक्ष्यं निर्वहन् संस्थानकुलपतिः आचार्यो राधावल्लभत्रिपाठी अवदत् यत् आचार्यमार्कमहोदयस्य गुरुपरम्परया संस्कृतस्य शैवशास्त्राणां च सेवा विलक्षणा वर्तते। भारतीयविद्यानाम् उद्धाराय तेषामिदं योगदानम् महदद्वितीयं वर्तते। कार्यक्रमे आचार्यः नवजीवनरस्तोगिमहोदयो मुख्यातिथित्वेन सम्प्राप्तः। परिसरप्राचार्येण आचार्यः सुरेन्द्रझामहोदयः समागतानाम् अतिथिवर्याणां सस्नेहं स्वागतं समाचरत्। आचार्यः सुरेन्द्रपाठकवर्यो धन्यवादज्ञापनं डा.लक्ष्मीनिवासपाण्डेयश्च सञ्चालनम् अकुरुताम्। अवसरेऽस्मिन् गणमान्यातिथिरूपेण आचार्यः ओमप्रकाशपाण्डेयः, आचार्यः ब्रजेशशुक्लः, आचार्यः राकेशचन्द्रः, डा. अरुणमिश्रः, आचार्यः उमारमणझाः, डा.चन्द्रकान्तद्विवेदी इत्यादयः नैके विद्वांसः समुपस्थिताः आसन्।




आचार्यमार्कमहोदयं सम्मानयन् प्राचार्यः

**स्वतन्त्रतादिवसः** – स्वतन्त्रतादिवसे परिसरप्राचार्येण आचार्यः सुरेन्द्रझामहोदयेन शिक्षायाः राष्ट्रियोद्दश्यानि आदाय शिक्षकाः कर्मचारिणः छात्राश्च राष्ट्रियैक्याय सम्प्रेरिताः। उपलक्ष्येऽस्मिन् परिसरीयछात्रैः भाषणगीतादिकार्यक्रमाः अपि प्रस्तुताः।

**शिक्षकदिवसः** – परिसरस्य शिक्षाशास्त्रविभागस्य संयोजने शिक्षकदिवसः समाचरितः। परिसरप्राचार्यः पावनावसरेऽस्मिन् शिक्षकाणां छात्राणाञ्च मिथः कर्तव्यमुक्त्वा शिक्षकेभ्यः अस्य दिवसस्य शुभाशयान् प्राकटयत्। शिक्षाशास्त्रविभागस्य डा.बच्चाभारती स्वीये भाषणे शिक्षकदिवसस्य महत्त्वं प्रतिपाद्य छात्राध्यापकेभ्य उत्तमशिक्षकत्वेन प्रकर्षाय विधिर्विधेय इति सन्देशं प्राददात्।

**हिन्दीपक्षः** – हिन्दीदिवसादारभ्य हिन्दीपक्षकार्यक्रमोऽपि परिसरे अभवत्। पक्षेऽस्मिन् हिन्दीभाषायाः प्रचाराय प्रसाराय च विविधकार्यक्रमाः समायोजिताः। समारम्भदिवसे आधुनिकविषयविभागस्य अध्यक्षः आचार्यः शिशिरकुमारपाण्डेयः राजभाषारूपेण हिन्द्याः ऐतिहासिकं परिचयं प्रदाय अद्यत्वे तस्याः दशां दिशश्चादाय स्वविचारान् प्राकटयत्। समारोहस्य अध्यक्षः परिसरप्राचार्यः राष्ट्रभाषायाः गौरवं प्रतिपाद्य कार्यालयगतं सर्वं कार्यं हिन्द्यां संस्कृते वा विधातुं सङ्कल्पं पुनरुक्तवान्। सभायाः सञ्चालनं डा.सुरेशप्रकाशसिंहः कृतवान्।

**प्राथमिकोपचारप्रशिक्षणकार्यक्रमः** – शिक्षाशास्त्रविभागीयछात्राध्यापकानां कृते ०३.०९.२०१२ तः १४.०९.२०१२ पर्यन्तं डा.




फलितज्योतिषपरिचयपाठ्यक्रमस्य उद्घाटनस्य किञ्चन दृश्यम्

अवनीश-अग्रवालमहोदयाया: संयोजने प्राथमिकोपचारप्रशिक्षणकार्यक्रम: अनुष्ठित:। शिबिरेऽस्मिन् छात्राध्यापका: प्राथमिकचिकित्साया: उपायान् विज्ञाय प्रायोगिकं कृतवन्त:।

**स्वर्णपदकं लब्धम्** – अगस्तमासस्य अष्टादशे दिनाङ्के क्रीडाभारतीत्यनया संस्थया मेरठप्रान्ते समायोजितायां योगासनप्रतियोगितायां डा.गजेन्द्रशर्मण: निर्देशने परिसरत: शास्त्रिप्रथमवर्षस्य त्रय: छात्रा: प्रतिभागं कृतवन्त:। तत्र शुभम् कुमार: स्वर्णपदकम् अमितकुमारश्च रजतपदकं प्राप्तवन्तौ। छात्र: प्रकाशकुमारोऽपि प्रतियोगितायां भागं गृहीतवान्।

**फलितज्योतिषपरिचयपाठ्यक्रमस्य समारम्भ:** – ज्योतिषशास्त्रस्य लोकोपयोगित्वमादाय प्रतिवर्षमिव अस्मिन् वर्षेऽपि फलितज्योतिषपरिचयपाठ्यक्रमस्य समारम्भ: २५.९.२०१२ इत्यस्मिन् अहनि जात:। अध्यक्षत्वेन प्राचार्य: आचार्य: सुरेन्द्रझा: पाठ्यक्रमस्यास्य सप्तमचक्रस्य उद्घाटनं व्यदधात्। सारस्वातिथिरूपेण सुरेन्द्रपाठक: विशिष्टातिथिरूपेण च आचार्य: रामलखनपाण्डेय: इत्येतावपि मञ्चे आस्ताम्। ज्योतिषविभागाध्यक्ष: डा. मदनमोहनपाठक: सस्वागतं समागतानां प्रविविक्षूणां कृते ज्योतिषशास्त्रस्य व्यावहारिकं मुखमुपस्थाप्य अस्य समसामयिकतां प्राकटयत्। पाठ्यक्रमेऽस्मिन् चिकित्साधिकारिण:, अभियन्तार:, पत्रकारा:, सैन्याधिकारिण:, प्रशासनिकाधिकारिण:, वित्तकोषाधिकारिण: इत्यादय: विविधा: गणमान्या: अष्टाविंशति: प्रशिक्षणार्थिन: समवेता:। सभाया: सञ्चालनं डा. अमितकुमारशुक्ल: धन्यवादज्ञापनञ्च डा. उमेशकुमारपाण्डेयश्चाकुरुताम्।



कार्यशालायां विचारयन्त: विद्वांस:

**कार्यशाला समायोजिता** – परिसरस्य पालि-अध्ययनकेन्द्रे दिनाङ्क 30.10.2012 त: 11.11.2012 पर्यन्तं बौद्धदर्शनविभागस्य प्रो.विजयकुमारजैनस्य मुख्यसंयोजने डॉ. चौबे-अवधेशस्य डॉ. नेगीगुरुचरणसिंहस्य संयोजकत्वे च त्रयोदशदिवसीयाया: पालिसंस्कृतच्छाया- संशोधनसम्पादनकार्यशालाया: आयोजनं सञ्जातम्। कार्यशालायामस्यां पालि-त्रिपिटकस्थ-संयुत्तनिकायस्य निदानवग्ग-खन्धवग्ग इत्यनयो: पालि-संस्कृतच्छायाकार्यमभवत्। अस्मिन् कर्मणि विशेषज्ञरूपेण प्रो. उमाशङ्करव्यास:, प्रो. वृषभप्रसादजैन:, प्रो. रामसागरमिश्र: इत्यादय: विद्वांस: स्वसहयोगमददु:।

DeefKeueYeejleer□ep□eesefle<eme□es<□er mecee□eesefpelee

राा ष्ट्रय-सा सवा्ृ ़त-सा स्थाानास्य (माा ानाता ावाश्वाा ावाद्याा लाा यास्य), लाखाानाऊपाा ास्सारे क्षा्ृ वा ़म्पा: पा्रााा्ृ ़ाातवा ़ाापादश चाक्क ा ावाषायो ऽा ास्माना् ाद्वा ादवासाा ाया राा ष्ट्रयज्या ाातषासाज्ञा ष्ठा ादसाम्बास्माासास्य १-२ ादनााङ्के सामााया ाा जाता। एषाा साज्ञा ष्ठा नावादे हला ास्था राा ष्ट्रय-सा सवा्ृ ़त-सा स्थाानाामा ु खयाा लाा स्या वाा ु ़ ला पाा ताा ाना ा पा्रा ा .राध्ाावाललाभाा ात्राापाा ाठमाहा दयाानाा पा्र रणाा याा तथाा सा स्थाानाा वाा ु ़ लाासाा ाचाा वाा ाना ा पा्र ा . वा ़ . बाा ा . साु ब्बााराय ु ड ु माहा दयाानाामाादे श ा ना सामाभावात्। अास्या: साज्ञा ष्ठ्या: सामा ु द्घााटना उ.पा्र . ा ावाध्ाानासाभााध्याक्षा णा श्रा ामाताा माातााप्रसाादपााण्डेयावाया ा णा अावा ़ााार। ा ावाा ाशष्टाा ाता ाथा पाादं उत्तारप्रा्र दे शाशाासानास्या पा्र ा ै द्याा ा ागवा ़ ा ाशक्षाा एवां हा मा गाडा ावाभाागा ायमा ान्त्राणाा श्रा ामाता बा्र ह्माशाङ्क ात्रापाा ाठमाहा दयो ना अालाङ्वा्ृ ़तमा्। सा स्थाानाामा ु खयाालायास्य वा ु ़ लासाा ाचावो ना पा्र . वा ़ . बाा . साु ब्बााराया ु डु माहा दे याना सा स्थाा ानावा ़ाा ाता ाथापादं साु शाा ाभातमा्। सामपा ूणाा नान्द-सा सवा्ृ ़त-ा ावाश्वाा ावाद्याा लायास्य

परिसरवार्ता:

परिसरवार्ता:

## मुम्बईपरिसरवार्ता:



शिक्षकदिवससमारोहस्य दृश्यमेकम्

**शिक्षकदिवसः** – सितम्बरमासस्य पञ्चमे दिनाङ्के परिसरेस्मिन् शिक्षकदिवसः समायोजितः। कार्यक्रमे संस्थानस्य उपकुलसचिवः डा. गोपीरमणमिश्रः मुख्यातिथिपदमलङ्कुर्वन् अकथयत् यत् डा. सर्वेपल्लिराधाकृष्णमहोदय इव सर्वेप्यध्यापकाः दार्शनिकाः, वक्तारः, लेखकाः, राजनेतारः निष्ठावन्तः च भवेयुरिति। अवसरेस्मिन् छात्राणां शास्त्रचर्चां श्रुत्वा स मुम्बईपरिसरः अन्यपरिसरैः सह शास्त्रविषये समत्वं प्रदर्शयतीति प्रावोचत्। ततः अध्यक्षः परिसरप्राचार्यः आचार्यः प्रकाशचन्द्रः शिक्षकः राष्ट्रनिर्माणे मुख्यः केन्द्रभूतः भवतीति समुदबोधयत्। तथैव अन्ये प्राध्यापकाः छात्रः च शिक्षकस्य कर्तव्यानां विषये स्वमतमुपस्थापितवन्तः। इत्थं शिक्षकदिवसः सर्वेषां सहयोगेन सम्पन्नः।

**क्रीडोत्सवः** – सितम्बरमासस्य पञ्चमदिनाङ्के संस्थानस्य उपकुलसचिवस्य डा. गोपीरमणमिश्रस्य आध्यक्ष्ये तत्करकमलाभ्यां परिसरे क्रीडोत्सवस्यापि समुद्घाटनमभवत्। तदारभ्य परिसरे युवमहोत्सवस्य कृते छात्राणां प्रतियोगितानां अभ्यासादयः समारब्धाः।

**हिन्दीपक्षः** – परिसरे १४ सितम्बर, २०१२ तः २८ सितम्बर, २०१२ पर्यन्तं हिन्दीपक्षः परिपालितः। सितम्बरमासस्य १४ दिनाङ्के हिन्दीदिवसं पुरस्कृत्य हिन्दीपखवाडाकार्यक्रमाणाम् उद्घाटनं समभवत्। परिसरप्राचार्यस्य आचार्यस्य प्रकाशचन्द्रस्य आध्यक्ष्ये कार्यक्रमोऽयं सञ्चालितः। अवसरेऽस्मिन् मुम्बईविश्वविद्यालयस्य पूर्वहिन्दीविभागाध्यक्षः आचार्यः रामजीतिवारिमहोदयः मुख्यातिथित्वेन समागत्य हिन्दीभाषामुद्दिश्य अवोचत्। तथैव विशिष्टातिथिपदमलंकुर्वन् क. जे. सोमैया कलावाणिज्यमहाविद्यालयस्य हिन्दीविभागाध्यक्षः डा. सतीशपाण्डेमहोदयः अकथयत् यत् हिन्दीभाषायाः लिपेः परिवर्तनं जायमानं वर्तते, अतः लिपिः संरक्षणीया इति। एवमेव सारस्वतातिथिः केन्द्रीयविद्यालयपवई इत्यस्य प्राचार्यः राष्ट्रपतिसम्मानितः डा. एन. डी. जोशीमहोदयः अकथयत् यत् सर्वेषां सहयोगेनैव हिन्दी राष्ट्रभाषापदं प्राप्तुमर्हतीति। तदा छात्राणां प्राध्यापकानाञ्च कविसम्मेलनमपि समायोजितम्। तत्र स्वरचितकाव्यानां पाठनेन सर्वे सभां तोषितवन्तः। अस्य कार्यक्रमस्य संयोजिका डा. गीता दुबे आसीत्।

**संस्कृतसप्ताहोत्सवे सञ्जाताः विविधाः कार्यक्रमाः** – परिसरे वर्षेऽस्मिन् दिवसत्रयव्यापिसंस्कृसप्ताहोत्सवः ०२.०८.२०१२ दिनाङ्कात् ०४.०८.२०१२ दिनाङ्कं यावत् सफल्येन सम्पन्नः। तत्र उद्घाटनसमारोहे कार्यक्रमस्यास्याध्यक्ष्यं वहन् परिसरप्राचार्यः प्रकाशचन्द्रः अवोचत् यत् संस्कृतभाषा जनभाषा भवेदिति, तदर्थं महाराष्ट्रसर्वकारपक्षतः अपि विशेषप्रयासः विधेयः इति। महाराष्ट्रमानसेविसंघटकः कार्यक्रमस्य मुख्यातिथिश्च पं. देवेन्द्रचौगुळे 'संस्थान-महाराष्ट्रमानसेविसंघटकयोः संयुक्ताध्वर्युत्वे अवश्यं संस्कृतभाषायाः प्रोन्नतिः भविष्यती'ति प्रावोचत्। महाराष्ट्रस्य पूर्वमानसेविसंघटकः किञ्च सारस्वतातिथिः पं. गुलामदस्तगीरबिराजदारः संस्कृतभाषामहत्त्वं प्रतिपादयन् 'संस्थाद्वयं यदि संस्कतभाषाप्रचारप्रसारे संयुज्य कार्यं कुरुतः तर्हि महान् उद्यमः भवती'ति अकथयत्। तथैव केन्द्रीयलोक-निर्माणविभागस्य मुख्याभियन्ता विशिष्टातिथिश्च श्री अभयसिन्हा 'अचिरादेव संस्थानस्य भवननिर्माणं भविता' इति समुदघोषयत्। एवमेव संस्कृतसप्ताहस्य उद्घाटनकार्यक्रमे शिक्षाशास्त्रविभागाध्यक्षः डा. मदनमोहनझाः संस्थानान्तर्गतस्य मुम्बईपरिसरस्य कार्यगतीः विन्यवेदयत्। अत्र सभायामतिथीनां स्वागतं डा. देवदत्तसरोदेः निरूढवान् एवं धन्यवादार्पणं डा. अशोकचन्द्रगौडेण विहितम्। सभासञ्चालनं श्री उपेन्द्रभार्गवेण सम्पादितम्। इत्थं संस्कृतसप्ताहस्योद्घाटनं सुचारुरूपेण समभवत्।




संस्कृत-सप्ताहोत्सवे भाषमाणः कुलसचिवः

संस्कृतसप्ताहस्य शुभावसरे द्वितीयदिवसे प्राचार्यस्य आचार्यप्रकाशचन्द्रमहोदयस्य आध्यक्ष्ये संस्कृतशास्त्रगोष्ठी ०३.०८.२०१२ दिनाङ्के समायोजि। गोष्ठ्यां अन्तर्जातीयगीतागुरुकुलसंस्थापकः धर्मप्रचारकः किञ्च विशिष्टातिथिः श्रीमान् योगी आनन्दमहोदयः ज्ञानस्य केन्द्रं संस्कृतमेवेति प्रत्यपादयत्। तस्यामेव सभायां खगोलशास्त्रविज्ञानी भारतीयविद्याभवनभौतिकविभागाध्यक्षपदवीतः सेवानिवृत्तः श्रीमान् मोहनहरि-आप्टे ज्योतिषशास्त्रं खगोलविज्ञानाधारमिति सप्रमाणं न्यगदत्। अत्र सभासञ्चालनं स्वागतभाषणञ्च श्री उपेन्द्रभार्गवेण, धन्यवादार्पणं श्रीधनञ्जयमिश्रेण च समपादि। संस्कृतसप्ताहसमारोहावसरे परिसरपक्षतः मुम्बइस्तरीयाः अन्तर्विद्यालयीयाः अन्तर्महाविद्यालयीयाः वादविवाद-संस्कृतभाषण-गीताकण्ठपाठ-श्लोकवाचनस्पर्धाः समायोजिताः। स्पर्धासु आसु सम्पूर्णमुम्बइपक्षतः विभिन्नेभ्यः विद्यालयेभ्यः बहवः छात्रः अध्यापकाश्च समागत्य भागं स्वीकुर्वन्। आगतानां सर्वेषां छात्राणाम् अध्यापकानाश्च गमनागमनव्ययभोजनादिव्यवस्थाः कल्पिताः। तत्र



पुरस्कारवितरणं कुर्वन् श्रीसमीरसौमैयावर्यः

स्पर्धानां सञ्चालनं डा. गायत्रीमुरलीकृष्णस्य संयोजने विहितम्। अत्र स्पर्धासु न्यायनिर्णेतृरूपेण मुम्बादेवी- आदर्शसंस्कृतमहाविद्यालयपक्षतः डा. मनमोहनतिवारी तथा च आई.आई.टी.पोवईमध्ये संस्कृतशोधच्छात्रः दीपेशकतिरामहोदयश्च समागतौ। अन्ये परिसरीयाः प्राध्यापकाः परीक्षकरूपेण समाविष्टाः।

सुचारुरूपसमायोजने संस्कृतसप्ताहस्य समापनोत्सवः परिसरेऽस्मिन् ०४.०८.२०१२ दिनाङ्के सम्पन्नः। परिसरप्राचार्यस्य प्रकाशचन्द्रस्य आध्यक्ष्ये कुलसचिवमहोदयस्य आचार्यस्य के.बी. सुब्बरायुडुवर्यस्य मुख्यातिथ्ये च कार्यक्रमोऽयं सम्पन्नः। कार्यक्रमेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः संस्कृतस्य महत्त्वं प्रतिपादयन् अधुना विश्वमनीषायाः सृष्टिः संस्कृतविज्ञानवाङ्मये पापत्यते अतः वयं अन्ताराष्ट्रियस्तरे संस्कृतस्य विकासार्थं यतामहे इति स्पष्टीकृतवान्। अस्मिन् समारोहे सोमैयान्यासाधीशः विशिष्टातिथिः समीरसोमैया अकथयत् यत् सम्पूर्णसोमैयापरिसरे संस्कृतस्य प्रचारः प्रसारः भवतु येन सच्चारित्र्यस्य निर्मितिः स्यात्। अवसरेऽस्मिन् अपरो विशिष्टातिथिः सोमैयान्याससदस्यः लीलाबेनकोटकवर्या संस्कृते सम्भाषमाणा: संस्कृतं व्यावहारिकी भाषा आसीदस्ति भविष्यतीति मतं प्रकटीकृतवती। कार्यक्रमे सम्मानितातिथिः कस्टम-विभागस्य अपरायुक्तः श्री.पि.अञ्जनीकुमार संस्कृतेन स्वसन्देशं प्रायच्छत्। तेन संस्कृतभाषायाः महत्त्वप्रतिपादनपूर्वकं, देववाण्याः संस्कृतभाषायाः भाषणेन पोषणेनैव भारतीया संस्कृतिः सुस्थिरा भवतीति प्रोक्तम्। पश्चात् कुलसचिवस्य कराब्जाभ्यां ज्योतिष-वास्तुव्यावसायिकपाठ्यक्रमयोः समुद्घाटनं सञ्जातम्, तथैव परिसरीयांशकालिकाध्यापकेन डा.राकेशजैनेन विरचितस्य वीरोदयमहाकाव्यस्य दार्शनिकतत्त्वानीति पुस्तकस्य विमोचनमपि विहितम्। अथ संस्कृतस्पर्धासु पुरस्कारभाग्भ्यः पुरस्कारान् अतिथयः प्रायच्छन्। अत्र सभायाम् अतिथीनां स्वागतं श्रीमता व्याकरणविभागाध्यक्षेण डा. बोधकुमारझामहोदयेन विहितम्। एवमेव धन्यवादार्पणं श्रीमन्तः शिक्षाशास्त्रविभागाध्यक्षः डा.मदनमोहनझा अकरोत्। पूर्णसभायाः सञ्चालनं डा. गायत्रीमुरलीकृष्णः निरूढवान्। कार्यक्रमान्ते सांस्कृतिककार्यक्रमाः समायोजिताः। कार्यक्रमेषु परिसरच्छात्राभिः सामूहिकनृत्यम्, एकलनृत्यं, गीतादिकञ्च प्रदर्शितम्। इत्थं संस्कृतसप्ताहः परिसरेऽस्मिन् सुसम्पन्नः।

**महाराष्ट्रगोवाराज्यस्तरीया शास्त्रीयवाक्स्पर्धा** – ऐषमः ५१तमाम् अखिलभारतीयशास्त्रीय- वाक्स्पर्धामुपलक्ष्य स्पर्धालुचयनप्रक्रिया महाराष्ट्रगोवाराज्यस्तरीयशास्त्रीयस्पर्धारूपेण विद्यापीठेन २७.११.१२ दिनाङ्के समायोजि। व्याकरणविभागाध्यक्षस्य डा. बोधकुमारझामहोदयस्य संयोजकत्वे समायोजिते कार्यक्रमे अस्मिन् त्रयोदशस्पर्धासु विविधेभ्यः संस्कृतविद्यालयेभ्यः महाविद्यालयेभ्यः द्वाविंशतिसंख्याकाः प्रतिस्पर्धिनः भागमगृह्णन्। न्यायनिर्णेतृरूपेण राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरतः आचार्यः वैद्यनाथझाः, आई.आई.टी. पवईतः आचार्यः मल्हारकुलकर्णी, भारतीयसंस्कृतिपीठतः डा. ललितानामजोशी, अध्यक्षरूपेण परिसरप्राचार्यः प्रकाशचन्द्रः च सभां समलङ्कुर्वन्। अत्र विजेतृच्छात्रेभ्यः प्रथमपुरस्काररूपेण १०००, द्वितीयपुरस्काररूपेण ७००, तृतीयपुरस्काररूपेण ५०० रूप्यकाणि परिसरपक्षतः प्रादीयन्त।

**राष्ट्रियसंस्कृतकविसम्मेलनम्** – ०९.११.२०१२ दिनाङ्के वाराणसीस्थ-श्रीबालयज्ञपीठसमित्या सहयोगेन विद्यापीठे राष्ट्रियसंस्कृतकविसम्मेलनं समायोजि। कविसम्मेलनस्योद्घाटनं विद्यापीठप्राचार्येण कृतम्। सोमैयापरिसराध्यक्षः श्रीसमीरसोमैया मुख्यातिथिपदमलङ्करोत्। तत्र डा. मदनमोहनझा, डा. बोधकुमारझा, डा.गायत्रीमुरलीकृष्णप्रभृतयः प्रायः २० कवयः स्वकाव्यपाठेन सभां समतोषयन्। कार्यक्रमस्य सञ्चालनं डा.माधवदत्तपाण्डेय-श्रीधनञ्जयमिश्रौ कुरुताम्।

**मुम्बापरिसरशिलान्यासः** – १९.१२.२०१२ दिनाङ्के मुम्बापरिसरे प्रमुखभवननिर्माणार्थं शिलान्यासकार्यक्रमः संस्थानस्य कुलसचिवस्य आचार्यस्य के.बी.सुब्बरायुडुमहोदयस्य पर्यवेक्षणे, प्राचार्यस्य आध्यक्ष्ये, मुख्यातिथेः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः करकमलाभ्यां समभवत्। गौरवातिथिः सोमैयासङ्कुलाध्यक्षः श्रीसमीरसोमैया, विशिष्टातिथिः केन्द्रीयलोकनिर्माणविभागस्य मुख्यसङ्घटकः एस.सी. गाङ्गिलमहाभागश्च शिलान्यासकार्यक्रमे यज्ञपूजादिकार्यक्रमेषु च स्वीयं योगदानं प्रादर्शयन्। सर्वेऽपि विद्यापीठीयसदस्याः छात्राश्च शिलान्यासकार्यक्रमे सांस्कृतिकवेषभूषया सश्रद्धं भागमवहन्।

**विद्याश्रीः नाम्नी अर्धवार्षिकपत्रिकायाः विमोचनम्** – २०-१२-१२ दिनाङ्के कुलपतेः काव्यकरकमलाभ्यां विद्याश्रीः इत्याख्यायाः विद्यापीठस्यार्धवार्षिकपत्रिकायाः विमोचनमभवत्। पत्रिकायां विद्यापीठीयशैक्षिकशैक्षिकेतरगतिविधयः सचित्रमाविष्क्रियन्ते। पत्रिकायाः प्रधानसम्पादकः परिसरप्राचार्यः प्रकाशचन्द्रः, सम्पादकः डा.मदनमोहनझाश्च वर्तेते।



मुम्बापरिसरभवन-शिलान्यासघट्टस्य दृश्यम्

परिसरवार्ताः

परिसरवार्ताः



व्याख्यानं प्रयच्छन् आचार्यः नवज्योतिसिंहः

## गङ्गानाथ-झापरिसरोदन्तः

**आचार्य-मण्डनमिश्र-स्मृतिव्याख्यानमाला सम्पन्ना** – ०९.०९.२०१२ दिनाङ्के प्रयागस्थे गङ्गानाथझापरिसरे संस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये 'आचार्यमण्डनमिश्रस्मृतिव्याख्यानमाला' आयोजिता। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन जातः। ततः कु. निहारिका झा इत्यनया 'कुलगीतं' 'स्वागतगीतं' च प्रस्तुतम्। अवसरेऽस्मिन् हैदराबादस्थेन अन्ताराष्ट्रियख्यातिप्राप्तेन विदुषा आचार्यनवज्योतिसिंहेन वैशेषिकदर्शने 'पदार्थलक्षणम्' इति विषयमधिकृत्य विशिष्टं व्याख्यानं प्रस्तुतम्।

स्वकीये स्वागतभाषणे परिसरप्राचार्येण आचार्येण सर्वनारायणझामहोदयेन विशिष्टवक्तृणां व्यक्तित्वं कृतित्वञ्चाधिकृत्य विचारः प्रकटितः। ततः स्वकीये विशिष्टव्याख्याने प्रो. नवज्योतिसिंहेन पावरप्वाइंट-प्रस्तुतिमाध्यमेन वैशेषिकदर्शनमधिकृत्य सप्तपदार्थानां विवेचनं अत्याधुनिकवैज्ञानिकपद्धत्या प्रस्तुतम्। तेन आत्मनः लक्षणमपि आधुनिकवैज्ञानिकरीत्यैव प्रतिपादितम्। भावपदार्थस्य नैकानि रूपाणि तेन चर्चितानि तथा भिन्न-भिन्न-दर्शनेषु स्वस्वरीत्या कथं भावपदार्थः अङ्गीकृतः इत्यस्मिन् विषये अपि विचारः व्यक्तीकृतः। अणोः सम्बन्धिनं विचारं प्रस्तुतवता तेनोक्तं यद् यस्य विभाजनं न भवितुमर्हति सः अणुः। तेन सृष्टेः निर्माणस्यापि चर्चा कृता। निरुक्तकारस्य यास्कस्य मतानुसारं तेन मनुष्यस्य परिभाषा अपि व्याख्यायिता।

स्वकीये अध्यक्षीयभाषणे आचार्येण राधावल्लभत्रिपाठिना आचार्यनवज्योतिसिंहस्य वैज्ञानिकदृष्ट्या प्रतिपादितं व्याख्यानं शोधाकार्यार्थम् उपयोगि वर्तते इति मतमुपस्थापितम्। तेनेतदप्युक्तं यद् दर्शनशास्त्रस्य अध्येतृभिः प्रो. सिंहेन सम्पर्कं साधयित्वा शोधस्य नवीनसंभावनाः उपस्थापनीयाः। तेनेतदपि सूचितं यत् राष्ट्रियसंस्कृतसंस्थानस्य सहयोगेन प्रो. सिंहमहोदयाः संस्कृतस्य बृहत्तरकोशनिर्माणे संलग्नाः सन्ति, स च निर्मीयमाणः कोशः इदानीमपि अन्तर्जाले द्रष्टुं शक्यते।



सङ्गोष्ठ्याः उद्घाटनभाषणं कुर्वन् कुलपतिः

कार्यक्रमस्य सञ्चालनं डा. बनमाली बिश्वालेन तथा धन्यवादज्ञापनं च प्रो. शैलकुमारीमिश्रया कृतम्। अस्मिन्नवसरे प्रयागनगरस्य नैके प्रमुखाः नागरिकास्तथा मूर्धन्यविद्वांसश्च उपस्थिताः आसन्।

**लोकार्पिताः ग्रन्थाः** – ०९.०९.२०१२ दिनाङ्के संस्थानस्य कुलपतिना आचार्येण राधावल्लभत्रिपाठिना गङ्गानाथझापरिसरीयशोधपत्रिकायाः त्रयाणामङ्कानां (६५-६७) लोकार्पणं कृतम्। एतेषु ६५तमस्य अङ्कस्य सम्पादकाश्च वर्तन्ते- आचार्यसर्वनारायणझा, डा. ललितकुमारत्रिपाठी डा. अपराजिता मिश्रा च। एवमेव ६६-६७ तमयोः अङ्कयोः सम्पादकौ स्तः- प्रो.सर्वनारायणझा, डा. बनमाली बिश्वालश्च।

अस्मिन्नवसरे कुलपतिना परिसरात् प्रकाशितानां द्वादशखण्डात्मिकानां विवरणात्मिकानां हस्तलिखितग्रन्थसूचीनां लोकार्पणं कृतम्। एतेषां खण्डानां सम्पादकाः सन्ति- प्रो.सर्वनारायणझा, डा. बीना मिश्रा तथा डा. रामकिशोर झा च। एतदवसरे पाण्डुलिपिसंग्रहालयविभागीयाः डा. बीना मिश्रा, डा. रामकिशोरझा, श्रीशैलेन्द्रपाण्डेयः, डा. संजयदुबे, श्रीरामसिंहः श्रीराजेशश्च कुलपतिना अङ्गवस्त्र-श्रीफलैः सम्मानिताः।

**त्रिदिवसीयः संस्कृतदिवससमारोहः** – प्रयागस्थे गङ्गानाथझा परिसरे त्रिदिवसीयः (६.८.२०१२ तः ०८.०८.२०१२पर्यन्तं) संस्कृतदिवससमारोहः आयोजितः।

प्रथमे दिवसे ०६.०८.१२ तमे दिनाङ्के समारोहस्यास्य शुभोद्घाटनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना आचार्येण अशोककुमारकालियामहोदयेन विहितम्। स्वकीये स्वागतभाषणे परिसरप्राचार्येण सर्वनारायणझामहोदयेन प्रत्यपादि यत् संस्कृतभाषायां धर्म-अर्थ-काम-मोक्षैः सह गणित-विज्ञानयोः विवेचनं भाषाशास्त्रं च वर्तते। स्वकीयाध्यक्षीयभाषणे आचार्येण अशोककालियामहोदयेन उक्तं यत् श्रावण्याम् उपाकर्म समाचर्य वेदाभ्यासः प्रारभ्यते। अतः तस्मिन्नेव दिने भारते सर्वत्र संस्कृतदिवसः परिपाल्यते। वस्तुतः संस्कृतज्ञाः योग-ध्यान-ज्योतिषादीनां सर्वेषां शास्त्राणां ज्ञातारो भवन्ति। संस्कृतज्ञान् प्रति इदानीं जनानां धारणा परिवर्तिता अस्ति। संस्कृतस्य विकासाय अस्माभिः सर्वैः प्रयासः करणीयः इति तदवसरे तेषां सन्देशः आसीत्। कार्यक्रमस्य सञ्चालनं डा. रामकिशोरझामहोदयेन धन्यवादज्ञापनं च डा. शैलजापाण्डेयायै प्रस्तुतम्।

एतस्मिन् त्रिदिवसीय-संस्कृतदिवससमारोहे परिसरे बहुविधाः स्पर्धाः आयोजिताः। तद्यथा – श्रीमद्भगवद्गीतापाठस्पर्धा, श्रीविष्णुसहस्रनामस्तोत्रपाठस्पर्धा, संस्कृतप्रश्नोत्तरीस्पर्धा अन्त्याक्षरीप्रतियोगिता चेति चतस्रः प्रतियोगिताः आयोजिताः, यासु नगरस्य विविधाविद्यालयेभ्यः, इलाहाबादविश्वविद्यालयाच्च छात्रा भागं गृहीतवन्तः। ०८.०८.१२ तमे दिनाङ्के समायोजिते समापनोत्सवे एतासु स्पर्धासु




जवाहरलालनेहरु-जयन्त्युत्सवस्य दृश्यमेकम्

विजेतारः प्रतिभागिनः परिसरस्य प्राचार्यचरेण जगन्नाथपाठकेन काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्यासङ्कायाध्येण आचार्यरमेशचन्द्रपण्डामहोदयेन च पुरस्कृताः।

समारोपकार्यक्रमस्य सञ्चालनं डा. बनमालीबिश्वालेन तथा धन्यवादज्ञापनं डा. उदयनाथझामहोदयेन च कृतम्।

**व्याकरण-विषयकं विशिष्टव्याख्यानं सम्पन्नम्** – त्रिदिवसीय-संस्कृतदिवससमारोहावसरे ०८.०८.२०१२ दिनाङ्के गङ्गानाथझापरिसरे व्याकरणविषयकं विशिष्टव्याख्यानं समायोजितम्। अस्मिन्नवसरे प्राचार्येण सर्वनारायणझामहोदयेन स्वागतभाषणं प्रस्तुवता प्रतिपादितं यदद्य भारतं स्वशास्त्रपरम्परायै पुनः विश्वगुरुरूपेण प्रतिष्ठितं वर्तते। विशिष्टवक्तृभिः काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्यासंकायाध्यक्षेण आचार्यरमेशचन्द्रपण्डामहोदयेन पतञ्जलिसम्मतं शब्दस्वरूपमिति विषयमधिकृत्य विशिष्टव्याख्यानं प्रस्तुतम्। स्वव्याख्यानप्रसङ्गे तेनोक्तं यद् भारतवर्षे ई.पू. १५० तमे संवत्सरे लब्धजन्मा महर्षिः पतञ्जलिः भारतीयज्ञानविज्ञानं स्वप्रतिभाबलेन समृद्धं कृतवान्। एतत्तु सर्वविदितं तथ्यं वर्तते यत् त्रिमुनि-व्याकरणपरम्परायां पाणिनिकात्यायनयोः अनन्तरं पतञ्जलेः स्थानम् अत्युत्कृष्टं मन्यते। तेन प्रतिपादितं यत् पतञ्जलिस्वीकृता शब्दपरिभाषा लोकव्यवहृतशब्दाधारेणैव कल्पिता वर्तते। लोके एव निवसता पतञ्जलिना व्याकरणसिद्धान्तानामुपस्थापनं स्वरचितमहाभाष्ये विस्तारेण कृतं वर्तते। अतः पतञ्जलिः सर्वेषां शास्त्रकाराणां पूजनीयः वर्तते इति।

व्याख्यानात् पूर्वं परिसरस्य व्याकरणविभागाध्यक्षेन डा. बनमालीबिश्वालेन विषयप्रवर्तनं कृतं, मूर्धन्यकविना परिसरस्य भूतपूर्वप्राचार्येण आचार्यजगन्नाथपाठकेन अध्यक्षीयं वक्तव्यं प्रस्तुतम्। अस्मिन्नवसरे विशिष्टवक्ता आचार्यरमेशचन्द्रपण्डा सम्मानितः।

**जवाहरलालनेहरू-जयन्ती** – परिसरे २७.११.२०१२ तमे दिनाङ्के भारतस्य प्रथमप्रधानमन्त्रिणः पं जवाहरलालनेहरोः जयन्त्यवसरे 'पं. जवाहरलालनेहरुः एकः अनुसन्धाता' इति विषयकं विशिष्टव्याख्यानं समायोजितम्। विशिष्टवक्तृरूपेण इलाहाबाद-संग्रहालयस्य निदेशकेन डा. राजेशपुरोहितवर्येण स्वकीये व्याख्याने प्रतिपादितं यत् पं. जवाहरलालनेहरूः वास्तविकः इतिहासकारः आसीत्। सः भारतं यथा दृष्टवान् तस्य निरूपणं तथैव कृतवान् स्वकीये भारतमेकमन्वेषणम् (Discovery of India) इत्यस्मिन् ग्रन्थरत्ने। स्वकीये व्याख्याने तेन एतदपि सूचितं यत् Discovery of India इत्यस्य मूलः हस्तलेखः इलाहाबाद-संग्रहालये सुरक्षितो वर्तते।

**महाकवि-कालिदासजयन्ती** – परिसरे २७.११.२०१२ तमे दिनाङ्के महाकवि-कालिदासजयन्त्यवसरे महाकवि-कालिदासस्य कृतिषु अनुसन्धानप्रविधिविषयकं विशिष्टव्याख्यानं समायोजितम्। मुख्यवक्तृरूपेण इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेन आचार्यः हरिदत्तशर्मणा प्रतिपादितं यत् महाकवेः कालिदासस्य कृतीनां टीकाः तथा पाश्चात्यविद्वद्भिः प्रस्तुताः समीक्षाग्रन्थाः अपि शोधविषयीभूताः सन्ति। स्वकीये अध्यक्षीयभाषणे इलाहाबाद-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरा आचार्यः मृदुलात्रिपाठीमहोदया महाकवि-कालिदासं सुरभमनोभावानां ज्ञातारमुदघोषयत्। कार्यक्रमस्य सञ्चालनं डा. रमाकान्तपाण्डेयेन कृतं तथा धन्यवादज्ञापनं च डा. रामकिशोरझा-महोदयेन कृतम्। अस्मिन्नवसरे प्रयागनगरस्य नैके संस्कृतानुरागिणः विद्वांसः छात्राश्च उपस्थिताः आसन्।




महाकविकालिदास-जयन्त्युत्सवस्य दृश्यमेकम्

## गुरुवायूर्परिसरवार्ता:

**दूरस्थशिक्षापाठ्यक्रमाणां सम्पर्ककक्ष्याणां समुद्घाटनम्** – राष्ट्रियसंस्कृतसंस्थानीयस्य गुरुवायूर्परिसरस्य 'पावरट्टी' स्थलस्थिते कुर्याक्कोस् स्मृतिभवनाख्ये केन्द्रे अस्य शैक्षिकवर्षस्य (२०१२-१३) दूरस्थशिक्षापाठ्यक्रमाणाम् उद्घाटनम् पावरट्टी पञ्चायत् उपाध्यक्षः श्री. बषीर जाफनामहोदयः १७.०९.२०१२ व्यधात्। परिसरप्राचार्यस्य आचार्यस्य एम्.बाबु महोदयस्य आध्यक्ष्ये प्रवृत्तेऽस्मिन् कार्यक्रमे प्रो. वि.के.शैलजा दूरशिक्षायाः संक्षिप्तविवरणम् अकरोत्। डा. इ.पि. श्रीदेवी महोदया मुक्तस्वाध्यायपीठस्य संयोजिका स्वागतम् व्याहरत्। पञ्चायत् सदस्येन श्री. फ्रान्सिस पुतूरमहोदयेन आशंसनं विहितम्। श्रीमती उमा सि.एन्. कृतज्ञतामाविरकरोत्। ऐषमः द्व्यधिकशतम् छात्राः प्राविशन्।

परिसरवार्ताः

## श्रीवेदव्यासपरिसरस्य कार्यक्रमाः



राज्यस्तरीयस्पर्धासु पुरस्कृताः छात्राः

**स्थानीयशोधसमितेः उपवेशनम्** – २२.११.२०१२ दिनाङ्के स्थानीयशोधसमितेः उपवेशनं विद्यावारिधिसंज्ञके शोधकर्मणि नूतनानां पञ्जीकरणार्थं समायोजितमासीत्। अस्मिन् भोपालपरिसरस्य अध्यापकः आचार्यः विद्यानन्दझा विशेषज्ञरूपेण उपस्थितः आसीत्। स्वकीयशोधसारसंग्रहैः सह षोडशच्छात्राः प्रसङ्गेऽस्मिन् उपस्थिताः आसन्।

**मोतीलालनेहरुस्मारकव्याख्यानम्** – विश्वविद्यालयानुदानायोगस्य निर्देशं पुरस्कृत्य परिसरेऽस्मिन् पं. मोतीलालनेहरुस्मारकव्याख्यानस्य आयोजनं २३.११.२०१२ दिनाङ्के जातम्। अवसरेऽस्मिन् हिमाचलप्रदेशशिक्षाविभागस्य पूर्वोपनिदेशकः श्रीहरीशगुलेरी सारगर्भितं व्याख्यानमदात्। कार्यक्रमस्यास्य सञ्चालकः आसीत् श्रीमनोजश्रीमालः।

**राज्यस्तरीयभाषणस्पर्धा** – अखिलभारतीयसंस्कृतभाषणस्पर्धायां हिमाचलप्रदेशतः भागग्रहणार्थं राज्यस्तरीयभाषणस्पर्धा नवम्बरमासस्य २२-२३ दिनाङ्कयोः सम्पादिता। स्पर्धायामस्यां हिमाचलप्रदेशस्थ-विभिन्नभागेभ्यः उपचत्वारिंशाः छात्राः छात्र्यश्च समवेताः आसन्। कार्यक्रमस्यास्य संयोजकौ डा. श्रीधरमिश्रः डा. पी.वी.बी. सुब्रह्मण्यं च आस्ताम्। शलाकादिपरीक्षाणां सञ्चालनं व्याकरणविभागस्य सहायकाचार्येण मधुकेश्वरभट्टेन, भाषणादीनां सञ्चालनं व्याकरणविभागस्य सहायकाचार्येण भानुशर्मणा च आचरितम्। अस्मिन् कार्यक्रमे निर्णायकेषु आचार्यविद्यानन्दझा, डा. भक्तवत्सलं, डा. सच्चिदानन्दतिवारी प्रभृतयः विद्वांसः आसन्।



मोतीलालस्मारकव्याख्यानकार्यक्रमस्य किञ्चन दृश्यम्

**अखिलभारतीयाद्वैतवेदान्तसम्मेलनम्** – वेदव्यासपरिसरे नवम्बरमासस्य २४-२५-२६ दिनाङ्केषु त्रिदिवसीयमखिलभारतीय-अद्वैतवेदान्तसम्मेलनं समायोजितम्। कार्यक्रमेऽस्मिन् भारतस्य विभिन्नप्रान्तेभ्यः पञ्चाशदधिकाः विद्वांसः समागताः आसन्। अवसरेऽस्मिन् सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः वेम्पटिकुटुम्बशास्त्री, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः रामानुजदेवनाथन्, काङ्गडाजनपदस्य उपायुक्तः, काङ्गडाजनपदस्य सुरक्षायुक्तः, उपसुरक्षायुक्तः अन्ये च गणमान्याः समवेताः आसन्।

**दशदिवसीया स्पर्धाप्रशिक्षणकार्यशाला** – परिसरस्य मार्गदर्शन-नियोजनप्रकोष्ठेन एका दशदिवसीया स्पर्धाप्रशिक्षणकार्यशाला १९.१२.२०१२ दिनाङ्कात् सञ्चालिता।



संस्कृतभाषाबोधनवर्गे मञ्चासीनाः विद्वांसः

## जयपुरपरिसरवार्ताः

**संस्कृतभाषाबोधनवर्गः** – जयपुरपरिसरे ऐषमः शिक्षाविभागेन २१ दिनात्मकः कश्चन संस्कृतभाषाबोधनवर्गः समायोजितः। १६.०७.२०१२ तः १४.०८.२०१२ दिनाङ्कं यावत् अयं कार्यक्रमः प्रचलितः। अस्य कार्यक्रमस्य संयोजनं डा. वाई. एस. रमेशः अकरोत्। वर्गस्य समापनकार्यक्रमे आचार्यः रामानुजदेवनाथन् विशिष्टव्याख्यानं प्रादात्।

**अखिलभारतीयदूरस्थशिक्षापाठलेखनकार्यशाला** – मुक्तस्वाध्यायपीठस्य तत्त्वावधाने १८.०७.२०१२ तः २८.०७.२०१२ दिनाङ्कपर्यन्तम् अखिलभारतीयदूरस्थशिक्षापाठलेखनकार्यशाला आयोजिता अभवत्। संस्थानस्य विविधपरिसरेभ्यः देशस्य विभिन्नकोणेभ्यश्च विद्वांसः समुपस्थाय कार्यशालायां पाठलेखनादिकम् अकुर्वन्।



संस्कृतसप्ताहोत्सवे सम्मानं प्राप्नुवन् आचार्यः श्रीकृष्णशर्मा

**संस्कृतसप्ताहोत्सवः** – परिसरेऽस्मिन् ३१ जुलाई, २०१२ तः ०७ अगस्त, २०१२ पर्यन्तं संस्कृतसप्ताहोत्सवः आचरितः। संस्कृतदिवसावसरे आचार्यः श्रीकृष्णशर्मा अन्ये च सम्मानिताः अभवन्। अवसरेऽस्मिन् परिसरे नैकाः स्पर्धाः अपि समायोजिताः अभवन्।

**हिन्दीपक्षः** – १४ सितम्बर, २०१२ तः २७ सितम्बर, २०१२ दिनाङ्कं यावत् परिसरे हिन्दीपक्षोत्सवः समायोजितः। अस्मिन् हिन्दीपक्षोत्सवावसरे परिसरे अनेकाः हिन्दीस्पर्धाः समायोजिताः अभवन्।

## भोपालपरिसरवार्ताः



नाट्यकार्यशालायाः दृश्यमेकम्

**कार्यशालासमापनम्** – जुलाईमासस्य विंशतितमे दिनाङ्के परिसरस्य नाट्यशास्त्रानुसन्धानकेन्द्रेण आयोजितायाः नाट्यकार्यशालायाः समापनकार्यक्रमः अभवत्। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण बरकत-उल्ला-विश्वविद्यालयस्य कुलपतिः आचार्या निशा दुबे, विशिष्टातिथिरूपेण संस्थानस्य परियोजनाधिकारी आचार्या शुक्ला मुखर्जी तथा च अध्यक्षत्वेन परिसरप्राचार्यः आजादमिश्रश्च मञ्चं विभूषितवन्तः आसन्। अवसरेऽस्मिन् राष्ट्रीयनाट्यविद्यालयस्य प्रो. के. एस. राजेन्द्रन् महोदयेन निर्देशितस्य 'उत्तररामचरितम्' इति नाटकस्य प्रस्तुतिः अभवत्। कार्यशालाप्रतिवेदनस्य वाचनं डा. संगीता गुन्देचा, स्वागतभाषणम् आचार्यपरमेश्वरनारायणशास्त्री, धन्यवादज्ञापनम् आचार्यविद्यानन्दझा च अकुर्वन्।

**संस्कृतोत्सवः** – परिसरेऽस्मिन् अगस्तमासस्य एकदिनाङ्कात् तृतीयदिनाङ्कं यावत् त्रिदिवसीयः संस्कृतोत्सवः समाचरितः। उत्सवस्यास्य उद्घाटनकार्यक्रमे महर्षिपतञ्जलिसंस्कृतसंस्थानस्य अध्यक्षः डा. मनमोहनोपाध्यायः, मुख्यातिथिरूपेण संस्कृतभारतीमध्यभारतस्य संघटनमंत्री श्रीजयप्रकाशगौतमः विशिष्टातिथिरूपेण उपस्थितौ आस्ताम्। आध्यक्षम् आचार्यः आजादमिश्रः निरवहत्।

उत्सवस्य द्वितीयदिने वत्सराजविरचितस्य भाणस्य रंगप्रस्तुतिः सञ्जाता। पुनीतसंज्ञाभिनीतस्य भाणस्य निर्देशनं डा. धर्मेन्द्रसिंहदेवः संगीतनिर्देशनं श्रीसञ्जयद्विवेदी च अकुरुताम्।

उत्सवस्य तृतीयदिने कविसमवायः आयोजितः। अत्र आचार्यः गणेशप्रसादत्रिपाठी, डा. निलिम्पत्रिपाठी, श्रीदयाशङ्करदाबके, परिसरविद्वांसः च काव्यपाठं कृतवन्तः। समापनकार्यक्रमस्य मुख्यातिथिः आचार्यः क्षेत्रवासीपण्डा, विशिष्टातिथिः आचार्यः उमा गुप्ता, सारस्वतातिथिः स्वतन्त्रतासेनानी च आचार्यः मूङ्गारामत्रिपाठी तथा च सम्मानीयातिथिः श्रीरामशरणशास्त्री आसन्।

**स्वतन्त्रतादिवसः** – भोपालपरिसरे अगस्तमासस्य पञ्चदशदिनाङ्के स्वतन्त्रतादिवससमारोहः आयोजितः। परिसरप्राचार्यः आजादमिश्रः ध्वजारोहणं कृत्वा उपस्थितानां मार्गदर्शनमकरोत्। छात्रैः अवसरेऽस्मिन् देशभक्तिगीतादीनि अपि प्रस्तुतानि।

**राधाकृष्णन्-स्मृतिव्याख्यानमाला** – सितम्बरमासस्य पञ्चमदिनाङ्के शिक्षकदिवसस्य उपलक्ष्ये परिसरे राधाकृष्णन् स्मृतिव्याख्यानमाला समायोजिता। अत्र महर्षिसान्दीपनीवेदवेदाङ्गप्रतिष्ठानस्य उपाध्यक्षचरः आचार्यः श्रीनिवासरथमहोदयः 'बाणभट्टस्य अतिद्वयीकथा' इति विषयमाश्रित्य व्याख्यानं कृतवान्। कार्यक्रमस्य आध्यक्षम् अटलबिहारीबाजपेयीहिन्दी- विश्वविद्यालयस्य कुलपतिः आचार्यः मोहनलालछीपा निरवहत्। स्वागतभाषणं परिसरप्राचार्यः आचार्यः आजादमिश्रः कृतवान्।

**परियोजनार्थमुपवेशनम्** – सितम्बरमासस्य षष्ठे दिनाङ्के संस्कृतशिक्षानुसन्धानसर्वेक्षणं नामिकायाः परियोजनायाः स्वरूपनिर्धारणाय विषयविशेषज्ञानां उपवेशनं सम्पन्नम्। परिसरप्राचार्यस्य आजादमिश्रस्य आध्यक्षे सम्पन्नेऽस्मिन् उपवेशने परियोजनायाः मार्गदर्शकः आचार्यः रामानुजदेवनाथः आचार्यः श्रीधरवशिष्ठः, आचार्यः बी. के. पासी, आचार्यः मुरलीधरशर्मा, आचार्यः चाँदकिरणसलूजा, आचार्यः परमेश्वरनारायणशास्त्री विषयविशेषज्ञत्वेन उपस्थिताः आसन्। परियोजनासमन्वयकः डा.नीलाभतिवारी उपवेशनस्य संयोजनम् अकरोत्।

**हिन्दीदिवसः** – सितम्बरमासस्य चतुर्दशदिनाङ्के परिसरेऽस्मिन् हिन्दीदिवसः समाचरितः। अवसरेऽस्मिन् छात्रेभ्यः विविधाः हिन्दीस्पर्धाः समायोजिताः। कार्यक्रमस्य मुख्यातिथिः बरकतउल्लाहविश्वविद्यालयस्य महिलाध्ययनकेन्द्रस्य अध्यक्षा आचार्या आशाशुक्ला आसीत्। अतिथिभिः हिन्द्याः सर्वव्यापकत्वं स्वीकृतम्। कार्यक्रमस्य आध्यक्षम् आचार्यः आजादमिश्रः निरवहत्। कार्यक्रमसंयोजनं डा. अर्चना दुबे अकरोत्।

**नाट्यप्रस्तुतिः** – परिसरस्य नाट्यानुसन्धानकेन्द्रेण अक्टोबरमासे उज्जयिन्यां राष्ट्रिसंस्कृतनाट्यमहोत्सवे एवं च नवम्बरमासे विश्ववेदसम्मेलने 'उत्तररामचरितम्' इत्यस्य नाटकस्य अभिनवा प्रस्तुतिः कृता। अत्र नाट्यानुसन्धाानकेन्द्रस्य कलाकारैः सह परिसरच्छात्र अपि सोत्साहं भागं व्याहरन्।

**अष्टोत्तरशतं शिबिराणि** – परिसरस्य शिक्षाशास्त्रविभागस्य शिक्षाशास्त्रीशिक्षाचार्यच्छात्रैः परियोजनाकार्यत्वेन भोपालस्य विविधसामाजिककेन्द्रेषु अष्टोत्तरशतसंस्कृतसम्भाषणशिबिरेषु प्रशिक्षणं कृतम्। एतानि शिबिराणि भोपालस्य विविधमहाविद्यालय-मन्दिरेष-वृद्धाश्रम-अनाथालय-बालिकासुधारगृहादीषु सामाजिककेन्द्रेषु च आयोजितानि। नग द्विसहस्राधिकाः नागरिकाः अत्र प्रशिक्षणं प्राप्तवन्तः।



**बालचरप्रशिक्षणम्** – परिसरस्य २५.१२.२०१२ दिनाङ्कात् शिक्षाशास्त्रीकक्षायाः छात्राणां 'भारतीयस्काउट एवं गाईड' इत्यस्य राज्यप्रशिक्षणकेन्द्रे गान्धीनगरे आधारबालचरप्रशिक्षकशिबिरम् आयोजितम्।

परिसरवार्ताः

## शृङ्गेरीपरिसरवार्ताः

**शारदाविशिष्टव्याख्यानमाला** – ऐषमः २३.०७.२०१२ दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः प्रथमं पुष्पं पुष्पितम्। तत्र डा. एन्. के. सुन्दरेश्वरन् (सहाचार्यः, कालिकटविश्वविद्यालयः), सर्वासां (वाग्वर्धिनि-स्पर्धिष्णु-वाक्यार्थ- विशिष्टव्याख्यासनमालापरिषदाम्) उद्घाटनं कृत्वा साहित्यशास्त्रे 'आदिकाव्यं काव्यशास्त्रञ्च' इत्यमुं विषयमधिकृत्य व्याख्यानमकरोत्। डा. राघवेन्द्रभट्टः अस्मिन् प्रसङ्गे प्रास्ताविकभाषणम् अकरोत्। तत्र परिसरप्राचार्या डॉ. एस्.राधा सभायाः अध्यक्षा आसीत्। विशिष्टव्याख्यानमालायाः संयोजकान्यतरः डा. गणेशईश्वरभट्टवर्यः धन्यवादमाविष्कृतवान्।

**वाक्यार्थपरिषत्प्रथमाधिवेशनम्** – ऐषमः ३१.०७.२०१२ दिनाङ्के वाक्यार्थपरिषदः प्रथमाधिवेशनं परिसरप्राचार्यायाः डा. एस्. राधायाः आध्यक्ष्ये प्राचलत्। अधिवेशनेऽस्मिन् मीमांसाविभागस्य प्राध्यापकः श्रीवेङ्कटेशताताचार्यः 'हेत्वाभासः' इति विषये, शिक्षाशास्त्रविभागस्य प्राध्यापकः डा. बालाजी 'प्रत्यक्षम्' इति विषये, व्याकरणविभागस्य प्राध्यापकः डा. कृष्णानन्तपद्मनाभः 'हलन्त्यम्' इति सूत्रविषये, शिक्षाशास्त्रविभागस्य प्राध्यापकः हरिप्रसादः 'अभिप्रेरणम्' इति विषये च वाक्यार्थविचारान् उपास्थापयन्। आचार्यः ए.पि. सच्चिदानन्दः पर्यवेक्षकभाषणमकार्षित्। डा. चन्द्रकान्तः कार्यक्रमस्य सञ्चालकः आसीत्।

**संस्कृतोत्सवः** – ०२.०८.२०१२ दिनाङ्के संस्कृतोत्सवकार्यक्रमः समारभ्यत। उडुपिसंस्कृतमहापाठशालायाः प्राचार्यः डा. सुरेशाचार्यः उत्सवमुद्घाट्य संस्कृतसारस्वतजगत भगवतो वेदव्यासस्य लौकिकालौकिकोन्नतिप्रदं योगदानं स्मारं स्मारं, अद्यत्वे वेदेषु निहितं तत्त्वं लौकिकेषु संक्रामयितुं परिश्रमस्य आवश्यकतां प्रत्यपीपदत्। दिनद्वयव्यापिनि उत्सवेऽस्मिन् छात्राणां कृते विविधाः स्पर्धाः समायोजिषत।

०३.०८.२०१२ दिनाङ्के संस्कृतोत्सवसमारोपः कार्यक्रमः प्रावर्तत। कार्यक्रमेऽस्मिन् डा. महेशकाकत्करः सारस्वताभ्यागतत्वेनोपस्थाय, प्राचीनैः ऋषिभिः महता परिश्रमेण सम्पाद्य दत्ता वेदशास्त्रादिसम्पदा अवश्यमस्याभिः संरक्षणीया, भारतीयेषु शास्त्रादिषु वैदेशिकानां स्वाम्यं साम्प्रतिके काले दृश्यमानं नितरां खण्डनार्हमिति, समदिक्षत्। ततश्च परिसररप्राचार्या डा. एस् राधा आध्यक्ष्यं समुपास्थापयत्।

**स्वातन्त्र्यदिनोत्सवः** – १५.०८.२०१२ दिनाङ्के स्वातन्त्र्यदिनमुपलक्ष्य परिसररप्राचार्यया डा. एस्. राधया राष्ट्रध्वजारोहणकार्यक्रमः प्रवर्तितः। तदनु समायोजितायां सभायां परिसरस्य प्राध्यापकाः ए.पि. सच्चिदानन्दादयः छात्राश्च बहवः स्वान्तन्त्रदिनमुपलक्ष्य भाषणमुपास्थापयन्। डा. हरिप्रसादः प्रास्ताविकभाषणमकरोत्। परिसरप्राचार्या डा. एस्, राधा आध्यक्ष्यमूढ्वा स्वविचारानुपातिष्ठिपत्।

**वाक्यार्थपरिषदः द्वितीयमधिवेशनम्** – २८.०८.२०१२ दिनाङ्के वाक्यार्थपरिषदः द्वितीयमधिवेशनं प्राचलत्। अधिवेशनेऽस्मिन् व्याकरणे डा. सि.एस्. नरसिंहमूर्तिः 'संयोगान्तस्य लोपः' इति विषये, शिक्षाशास्त्रे डा. सोमनाथसाहुः 'शैक्षिकसूत्राणां वैज्ञानिकस्वरूपम्' इति विषये, मीमांसायां डा. सूर्यनारायणभट्टः 'विश्वजिन्यायः' इति विषये, शिक्षाशास्त्रे डा. गणेशपण्डितः 'शास्त्रीयानुबन्धनसिद्धान्तः' इति विषये च वाक्यार्थं व्यधुः। मीमांसाविभागाध्यक्षः डा. सुब्रायभट्टः पर्यवेक्षकभाषणमकरोत्।

**शिक्षकदिवससमारोहः** – ०५.०९.२०१२ दिनाङ्के परिसरे शिक्षकदिवससमारोहः अनुष्ठितः। तस्मिन् दिने प्रातः बसरिकट्टे सद्गुरुप्रौढशालायाः प्राध्यापकः श्रीरामेगौडः, कोप्पपत्तनस्य पदविपूर्वविद्यालयस्य उपन्यासकः श्री पी. नागराजभट्टश्च प्राचार्यायाः डा. एस्, राधावर्यायाः आध्यक्ष्ये प्रवृत्तायां सभायां सम्मानितौ।

**हिन्दी दिवससमारोहः** – १४.०९.२०१२ दिनाङ्के परिसरे हिन्दीदिवससमारोहः समाचर्यत। समारोहेऽस्मिन् हेदराबादस्थ IIIT तः समागतः आचार्यः हर्विन्दरसिंहः मुख्यातिथिपदमलङ्कृत्य वैदेशिकभाषाणां संस्कृतेश्च आक्रमणं प्रतिरोद्धुं राजभाषा हिन्दी प्रत्येकेन भारतीयेन समुपासनिया इति समदिक्षत्। हिन्दीदिवसमुपलक्ष्य प्रवर्तितासु विविधासु स्पर्धासु विजेतृभ्यः पारितोषिकं च वितरितवान्।

शारदाविशिष्टव्याख्यानमालाः द्वितीयं पुष्पम् – १७.०९.२०१२ दिनाङ्के शारादाविशिष्टव्याख्यानमालायाः द्वितीयं व्याख्यानं सञ्जातम् । तत्र के. साम्बशिवमूर्तिः शिक्षाशास्त्रे 'औपनिषदं शिक्षादर्शनम्' इत्यमुं विषयमधिकृत्य वेदवाक्यानामुद्धरणपूर्वकं सुदीर्घं व्याख्यानमकरोत्।

वाक्यार्थपरिषत् – २५.०९.२०१२ दिनाङ्के वाक्यार्थपरिषदः तृतीयाधिवेशनं सुसम्पन्नम्। अस्मिन्नधिवेशने ज्यौतिषविभागात् डा. ईश्वरभट्टः 'सङ्क्रान्तिः' इति विषये, साहित्यविभागात् डा. राघवेन्द्रभट्टः 'नानार्थस्थले बोधक्रमः' इति विषये, साहित्यविभागादेव श्री के. विनयकुमारः च 'भारवेः संसृष्टिसंकरालङ्कारयोः विन्यासवैचित्र्यम्' इति विषये वाक्यार्थनुपास्थापयन् । वेदान्तविभागाध्यक्षः डा. आर्. प्रतिभा सर्वान् वाक्यार्थान् पर्यवेक्षत।

**गुरून् कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा।**
**येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम्॥**
–किरातार्जुनीयम् ११.६४

# मुक्तस्वाध्यायपीठ-प्रकाशनानि

## स्वाध्यायसामग्री (Self Learning Materials)

### साहित्यम्

| क्र.सं. | स्वाध्यायसामग्री-नाम | खण्डाः |
|---|---|---|
| 1. | स्वप्नवासवदत्तम् श्रुतबोधश्च | 5 |
| 2. | काव्यदीपिका (कान्तिचन्द्रभट्टाचार्यसङ्कलिता) | 5 |
| 3. | लघुसिद्धान्तकौमुदी (सुबन्ततिङन्तप्रकरणे परित्यज्य) | 8 |
| 4. | साहित्यदर्पणः (प्रथम-दशमपरिच्छेदौ) | 5 |
| 5. | कादम्बरी (शुकनासोपदेशान्तभागः) | 7 |
| 6. | काव्यप्रकाशः (1-6 उल्लासाः) | |
| 5 | | |
| 7. | ध्वन्यालोकः (प्रथमचतुर्थौ उद्योतौ) | 5 |
| 8. | ध्वन्यालोकः (द्वितीयतृतीयौ उद्योतौ) | 5 |
| 9. | व्यक्तिविवेकः (प्रथमविमर्शः) | 4 |

### व्याकरणम्

| | | |
|---|---|---|
| 1. | लघुसिद्धान्तकौमुदी (आदितः भ्वादिपर्यन्ता) | 6 |
| 2. | वैयाकरणसिद्धान्तकौमुदी (आदितः पञ्चसन्ध्यन्तो भागः) | 4 |
| 3. | वैयाकरणसिद्धान्तकौमुदी (स्त्रीप्रत्ययादारभ्य समासाश्रयविधिपर्यन्तोभागः) | 11 |
| 4. | लघुशब्देन्दुशेखरः (पञ्चसन्ध्यन्तो भागः) | 7 |
| 5. | महाभाष्यम् (प्रथमाध्यायस्य प्रथमे पादे 5 तः 9 आह्निकं यावत्) | 5 |
| 6. | परिभाषेन्दुशेखरः | 7 |
| 7. | वैयाकरणभूषणसारः | 6 |
| 8. | वैदिकवाङ्मयस्येतिहासः भारतीया संस्कृतिश्च | 5 |
| 9. | तर्कभाषा | 4 |
| 10. | महाभाष्यम् (प्रथमाध्याये प्रथमपादे आदितः चत्वारि आह्निकानि) | 3 |
| 11. | कारकप्रकरणम् (सिद्धान्तकौमुदीतः) | 2 |
| 12. | समासप्रकरणम् (लघुसिद्धान्तकौमुदीतः) | 1 |

### ज्यौतिषम्

| | | |
|---|---|---|
| 1. | भास्करीयबीजगणितम् (चक्रवालपर्यन्तम्) जन्मपत्रदीपकम् | 5 |
| 2. | लघुजातकम् | 4 |
| 3. | ताजिकनीलकण्ठी (संज्ञातन्त्रमात्रम्) | 4 |
| 4. | भारतीयकुण्डलीविज्ञानम् | 5 |
| 5. | बीजगणितम् | 2 |

अन्ये ग्रन्थाः प्रकाशनाधीनाः वर्तन्ते। एते ग्रन्थाः सर्वेषु परिसरेषु अपि उपलब्धाः सन्ति।

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.V Issue Nos.17-18 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007